
मार्गशीर्षः
वर्षम् – ६९
द्वितीयोऽङ्कः
विक्रमाब्दः २०७५
युगाब्दः ५१२०
५ दिसम्बर २०१८

ISSN 2249-698X

# भारती

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–

## संस्कृत–मासपत्रिका



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | श्रीकृष्णमन्त्रमहास्तोत्रम् | आचार्य पं. नथमलशास्त्री दाधीचः | ५ |
| ५ | मञ्जुनाथीय-गज़ल-गीतयः | प्रधानसम्पादकः | ६ |
| ६ | पुस्तकसमीक्षाः | म.म. देवर्षिकलानाथशास्त्री | ९ |
| ७ | यूयम् | डॉ. हर्षदेवमाधवः | ११ |
| ८ | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १२ |
| ९ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | १३ |
| १० | भारतभूम्याः विभूतयः | अविनाश शर्मा | १४ |
| ११ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | १६ |
| १२ | राजर्षेः सन्त-पीपावर्यस्य सामाजिकी चेतना | ललित शर्मा | १७ |
| १३ | शास्त्रनिर्णीतनिपातविधानम् | योगेश्वरस्वामी | २१ |
| १४ | शारदातनयस्तदीयं भावप्रकाशनञ्च | दिव्या शर्मा | २५ |
| १५ | पाणिनीयम् इत्सञ्ज्ञाविज्ञानम् | लोकेश कुमार शर्मा | २८ |
| १६ | संस्कृतसमाचाराः | प्रधानसम्पादकः | २९ |
| १७ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १८ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |
| १९ | यौतुकी समस्या | डॉ. राकेश शास्त्री | ३५ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**

स्व. परमाचार्यः

श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ

स्व. उमाकान्तकेशवआप्टे

( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

स्वामी विश्वेशतीर्थः

स्वामी सत्यमित्रानन्दगिरिः

स्वामी रामभद्राचार्यः

आचार्यः अविचलदासः

स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्यारेमोहनशर्मा

प्रबन्धसम्पादकः

सुदामा शर्मा

सहसम्पादकौ

प्रो. सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता

ओ.पी. गोयलः

पृष्ठसंयोजनम्

श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्

rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

दत्तात्रेयमुनेर्जनिः समभवन्मार्गे सिते पक्षके

यो जूनागढनामके गिरिवरे घोरं तपोऽतप्यत।

तत्राद्यापि जनास्तदीयचरणौ वन्दन्ति वै श्रद्धया

भक्तानां हितसाधकं ऋषिवरं वन्दामहे सादरम्।।

## मासावतरणम्

ट्यूबस्योष्णजलेन स्नान्ति विबुधा ब्राह्मे मुहूर्ते शुभे,

स्नानार्थं न सुखाय शीतलजलं मार्गे सदा सेवितुम्।

सन्देष्टुं भुवनं सुरासुरगणैर्वेदादिभिः संस्तुतः,

साक्षाद्विष्णुरुपागतः सुरनुतः मार्गात्मकः साम्प्रतम्।।


कार्यालयः

बी-15, भारतीभवनम्

न्यू कॉलोनी, जयपुरम् ( राज. )

ई-मेल sanskritbharti09@gmail.com

मार्गशीर्षः

वर्षम् 69

वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2075

दिसम्बर, 2018

अङ्कः -2

पञ्चवार्षिकशुल्कम् 500/-

आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# वैविध्ये भारतीया एकात्मता महनीया

...✍ पं. प्यारेमोहनशर्मा

**सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्च।**
**वेदैश्च सर्वैरहमे वेद्यो वेदान्तकृद् वेदविदेव चाहम्।।**

एतेन सिद्ध्यति यत् भारतीयाः सम्पूर्णविश्वे एकात्मभावमामनन्ति। इतिहासकारः विंसेंटस्मिथो लिखति असंदिग्धरूपेण भारते गभीरा एकात्मता विद्यते सा चैकात्मता केवलं भौगोलिकी राजनैतिकी वा न विद्यते, जातिभाषा-सम्प्रदायवेशभूषा अपितु सांस्कृतिकपरम्परा- (रीति रिवाज) प्रभृतिषु विविधतासु सर्वान् भारतीयान् एकसूत्रे बध्नाति।

वैदिककालादाधुनिककालपर्यन्तं प्राचीन ऋषिमुनिभ्य आधुनिककविगणपर्यन्तं वयं स्वदेशं मातृवत् पूजयामः। ऋग्वेदे भूमिसूक्ते भारतभूमेः गुणाः वर्णिताः। अस्याः प्राकृतिकसौन्दर्यं वनानि पर्वताः नद्यः स्रोतांसिप्रभृतीनां वर्णनं कुर्वता भारतभुवो रत्नगर्भा इत्याख्यानं कृतम्। सर्वेषां मंगलकारिण्या भारतमातुः पवित्रताया इतिवृत्तस्या चातिसुन्दरं विवेचनं सूक्ते कृतम्। अस्यामेव वन्दनायामस्माकं जीवनपद्धत्या जीवनमूल्यानामपि साक्षात्कारो जायते।

अत्रैवोक्तं देवा अपि भारते जनिमिच्छन्ति। विष्णुपुराण भागवतमहापुराणब्रह्मपुराणान्यपि घोषयन्ति यत् एतादृशोऽयं भारतदेशो यत्र देवा अपि जन्म इच्छन्ति। यतोहि तेऽपि भारते जन्मनैव निर्वाणं प्राप्स्यन्ति। अत एव देशोऽयं स्वर्गादप्यतिरिच्यते। भगवता रामेणाप्युक्तम्-

**अपि स्वर्णमयी लङ्का न मे लक्ष्मण रोचते।**
**जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।**

**कालिदासो लिखति -**

**अस्त्युत्तरस्यां दिशि देवतात्मा, हिमालयो नाम नगाधिराजः। पूर्वापरौ तोयनिधीवगाह्य, स्थितः पृथिव्या इव मानदण्डः**, मेघदूते रामगिरेः सौन्दर्यमाध्यमेन भारत-भूमेः स्निग्धतां वर्णयति जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु वसतिं रागगिर्याश्रमेषु, हिमालयस्य वर्णनं कुर्वन् लिखति -

**अनन्तररत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।**
राजशेखरः काव्यमीमांसायां मातृभूमेः महत्वं वर्णयति।

हिन्दीभाषायाः कवयः जयशङ्करप्रसाद-रामधारी-सिंहदिनकर-मैथिलीशरणगुप्त-अयोध्यासिंह-उपाध्यायाः स्वीयकाव्येषु स्वेन स्वेन प्रकारेण भरतभूमेः वन्दनां कुर्वन्ति अस्याः सौन्दर्यञ्च वर्णयन्ति। सर्वेषां भाव एक एव विद्यते। सर्वेज्ञा पयन्ति यदेषु पुण्यभूमिः मातृभूमिः देवभूमिः मातृवत् पूजनीया वन्दनीया च विद्यते। प्रातः स्मरणीया भारतभूमिः। विवेकानन्दो विदेशादागत्य सर्वतः प्रथमं भारतभूमौ सुष्वाप। अत्रत्यां मृत्तिकां शरीरे पौनःपुन्येन-अलिम्पत। वीर सावरकरः कालापानीनाम-कारागरात् समागमनानन्तरं अस्याः रजः स्वशरीरे पुनः पुनः अलिम्पत्। एष एव मातृभावः बंकिमचन्द्रचटर्जी महोदयानाम् ''**आनन्दमठे**'' वन्दे मातरम् रूपे प्रकटितोऽभवत्। रवीन्द्रनाथ टैगोरमहोदयानां जनगणमनअधिनायक जय हे भारतभाग्यविधाता इति राष्ट्रगीतं वंकिमचन्द्रस्य वन्देमातरगीतमनेक स्वातन्त्र्यवीरान् मातृभूम्यै स्वप्राणोत्सर्गस्य प्रेरणां प्रायच्छताम्।

**भारतमाता दुर्गा वर्तते -**

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि दारिद्रय दुःखभयहारिणिका त्वदन्या, सर्वोपकारकरणाय सदार्द्रचित्ता। इतिहासकारो राधाकुमुद-मुखर्जी स्वीयपुस्तके "Fundamental Unity of India" (भारतस्य मूल एकता) नाम्रि पुस्तके भारतं हिन्दुत्वं च शरीरं आत्मा चेति रूपेण रेखाङ्कितं करोति। भारतमाता एव दुर्गा विद्यते। सी.ई. एम. जोड इंग्लैण्डस्य दार्शनिको लिखति-

कारणं किमपि स्यात् परन्तु इदं सत्यमस्ति यद्वैविध्ये एकतोत्पादनकौशलं सम्पूर्णविश्वाय भारतस्य विशिष्टोपहारो वर्तते। भारते सर्वदा विविधविचारेषु विभिन्न-समुदायेषु सामञ्जस्योत्पादनक्षमता-इच्छाशक्तिः च विद्यते। अत एवोक्तम्- **सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग भवेत्।।**

# श्रीकृष्णमन्त्रमहास्तोत्रम्

( श्रीकृष्ण:शरणं मम )

( पूर्वानुवृत्तम् )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

आद्यन्तवज्जगत्सर्वं, असन्मायाविनिर्मितम्।
जाप्यो मायापतेर्मन्त्रः श्रीकृष्णः शरणं मम।। 232।।

आद्यः स्थवीयसां कृष्णः स्थविष्ठो धारणाश्रयः।
भूतं भव्यं भविष्य में श्रीकृष्णः शरणं मम।। 233।।

कृष्णो मे परमं धाम कृष्णो मे परमं पदम्।
परं प्रेमास्पदं कृष्णः श्रीकृष्णः शरणं मम।। 234।।

भावद्रव्यैः सदा सेव्यो भावग्राही जनार्दनः।
भावुकैः रसिकैर्जाप्यः श्रीकृष्णः शरणं मम।। 235।।

श्रोतव्यो भगवान् कृष्णः कीर्तितव्यः सदा नृणाम्।
स्मर्तव्यः सर्वभूतात्मा श्रीकृष्णः शरणं मम।। 236।।

वटपत्रपुटे कृष्णः शयानः सुन्दरः शिशुः।
मुकुन्दो योगमायेशः श्रीकृष्णः शरणं मम।। 237।।

तत्त्वमसीतिमन्त्रार्थः कृष्णस्तत्त्वविदां वरः।
न हि कृष्णाात्परं तत्त्वं श्रीकृष्णः शरणं मम।। 238।।

शेषशायी महाविष्णुर्लक्ष्मीकान्तश्चतुर्भुजः।
शान्ताकारः सदा ध्येयः श्रीकृष्णः शरणं मम।। 239।।

विश्वम्भरश्च विश्वात्मा विश्वमूर्तिरमूर्तिमान्।
विश्वनाथो विभुर्भूमा श्रीकृष्णः शरणं मम।। 240।।

मायया मोहयन् विश्वं माययोपात्तविग्रहः।
केशवो माधवः कृष्णः श्रीकृष्णः शरणं मम।। 241।।

हे योगेश्वर! गोविन्द! मा मे गर्भो निपात्यताम्।
उत्तरा करुणं प्राह श्रीकृष्णः शरणं मम।। 242।।

संररक्षोत्तरागर्भं वासुदेवो गदाधरः।
विष्णुरातः सुतो जातः श्रीकृष्णः शरणं मम।। 243।।

हे कृष्ण ! देवकीपुत्र ! केशव ! क्लेशनाशन !
विपद्ग्रस्ता पृथा प्राह श्रीकृष्णः शरणं मम।। 244।।

द्रव्यशक्तियुतः कृष्णः क्रियाशक्तिपरः प्रभुः।
ज्ञानशक्त्यार्चितः कृष्णः श्रीकृष्णः शरणं मम।। 245।।

कृष्णेनैवावृतं विश्वं सर्वं कृष्णमयं जगत्।
पुरुषोऽन्तर्बहिः कृष्णः श्रीकृष्णः शरणं मम।। 246।।

गूढार्चिः सबलः कृष्णो गोपीगोपगणावृतः।
कौमारे गोकुले रेमे श्रीकृष्णः शरणं मम।। 247।।

लोकवेदपथारूढो द्वार्वत्यां सांख्यमास्थितः।
आत्मारामो ह्यनासक्तः श्रीकृष्णः शरणं मम।। 248।।

सत्त्वस्थो विरजः शान्तः श्रीनिकेतश्चतुर्भुजः।
पीतकौशाम्बरः कृष्णः श्रीकृष्णः शरणं मम।। 249।।

प्रत्यगात्मा परं धाम पुमानाद्योऽखिलेश्वरः।
अप्रमेयः स्वयंज्योतिः श्रीकृष्णः शरणं मम।। 250।।

शार्ङ्गधन्वा सुरार्तिघ्नः शरण्यो गरुडध्वजः।
सर्वभूतात्मभूतात्मा श्रीकृष्णः शरणं मम।। 251।।

यज्ञकृद् यज्ञयुग्विष्णुर्यज्ञेशो यज्ञपूरुषः।।
इष्टकामप्रदो देवः श्रीकृष्णः शरणं मम।। 252।।

कृष्णः सन्तानगोपालमन्त्राभीष्टफलप्रदः।
वंशवृद्धिकरो देवः श्रीकृष्णः शरणं मम।। 253।।

गोविन्दो गोकुलानन्दो वासुदेवो जगत्पतिः।
पुत्रदो देवकीपुत्रः श्रीकृष्णः शरणं मम।। 254।।

विभुरात्मवतामात्मा स्वयम्भूः सद्गुणाश्रयः।
निर्गुणः सगुणः कृष्णः श्रीकृष्णः शरणं मम।। 255।।

साक्षी सर्वगतः सत्यःसर्वकारणकारणम्।
अनादिनिधनो देवः श्रीकृष्णः शरणं मम।। 256।।

नवनीतप्रियो बालकृष्णो गोपसखा सुहृत्।
सुस्मितः सुन्दरः श्यामः श्रीकृष्णः शरणं मम।। 257।।

कृष्णः क्षराक्षरातीतः कृष्णो हि पुरुषोत्तमः।
लोकत्रयेश्वरः कृष्णः श्रीकृष्णः शरणं मम।। 258।।

द्रष्टा दृश्योऽभवद् भक्त्या ह्यनादिर्निर्गुणोऽव्ययः।
सर्वत्रावस्थितः कृष्णः श्रीकृष्णः शरणं मम।। 259।।

चित्तं कृष्णे मनः कृष्णे ध्यानं कृष्णे स्थिरा मतिः।
स्मृतावन्ते च मे मन्त्रः श्रीकृष्णः शरणं मम।। 260।।

''श्रीकृष्णमन्त्र महास्तोत्रे षष्ठो विरामः''

।। श्रीकृष्णः शरणं मम।।

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )

गीतिगोपुरम्

# मञ्जुनाथीय-गज़ल-गीतयः

उर्दूकाव्यसहजा गजलगीतिरद्य सुतरां लोकप्रिया-ऽस्ति। विविधासु भारतीयभाषासु गजलगीतयः प्रणीयन्ते गीयन्ते च देशेऽस्मिन्नपि। उर्दूत इतरासु भाषासु गज़लगीतीनामवतारणा यदाऽभूत्तदा सर्वप्रथमं संस्कृते साऽभूदित्याश्चर्यकरं तथ्यं शोधविद्वद्भिः प्रस्तुतमासीद् गतशताब्द्यामेव। संस्कृते सर्वप्रथमं गजलगीतीनां लेखनं जयपुरीयक-विशिरोमणिना देवर्षिभट्टश्रीमथुरानाथशास्त्रिणा कृतमासीत्, प्रकाशनं च पत्रपत्रिकासु संजातं, गीतिवीथी विंशशताब्द्याः प्रारम्भे प्रकाशिताऽभूत्। तदनु सिन्धी-गुजराती-प्रभृतिभाषासु गजलगीतयो व्यलेख्यन्त। हिन्द्यां तदनन्तरं दुष्यन्तकुमार-सूर्यभानु-गुप्तप्रभृतिभिर्लिखिता गजलगीतयो लोकप्रिया अभूवन्।

अत्र प्राचीनतमानां भट्टश्रीमथुरानाथशास्त्रि-''मञ्जुनाथ'' लिखितानां गजलगीतीनां किञ्चिन्नि-दर्शनं प्रस्तोतुं चतस्रो गज़लगीतयः पाठकानां प्रमोदाय प्रस्तूयन्ते। तासां समच्छन्दोऽनुवादः स्वयं कविवर्यस्य (मञ्जुनाथस्य) तनूजया विदुष्या कवयित्र्या च जया-गोस्वामिवर्यया कृतः सहैव प्रकाश्यते।

प्रधानसम्पादकः

## गीतिः-1 पीडा च तापश्च

रतिविगमोऽत्र मानसे कोऽयम् ?
अवमनुते मुधैव लोकोऽयम्।।1।।
अयि सुहृदो विधीयतां किं वा ?
मम हृदयं दुनोति शोकोऽयम्।।2।।
मतिरयते पलायते धैर्यम्।
न पुनरपैति हन्त तापोऽयम्।।3।।
हिमसलिलैरथोत्पलैः किं वा ?
शिशिरशतैर्न याति दाहोऽयम्।।4।।
अयि भिषजो मुधा निदानं वः।
दुरवगमो ममाऽस्ति रोगोऽयम्।।5।।
विरहकृशं विलोक्य मामाह।
न परिचिनोमि वर्तते कोऽयम्।।6।।
अधिहृदयं निधाय सोऽवादीत्।
कियदयि भोः प्रयाति खड्गोऽयम्।।7।।
अदय विधे ! विधेहि मे पीडाम्।
कठिनतमो ममाऽपि देहोऽयम्।।8।।
अयि जहि मञ्जुनाथ ! ते मन्युम्।
त्वयि दयते सुहृत् समाजोऽयम्।।9।।

(मञ्जुनाथः)

समच्छन्दोऽनुवादः

## कोऽयम् ? उद्वेलन मन का

मन उद्वेलन कैसा है यह।
जग से कटने जैसा है यह।।1।।
मेरे दुख का पार नहीं है।
मित्रो, मन के घुन सा है यह।।2।।
बुद्धि पलायन कर जाती है।
ताप अजब सुधि हरता है यह।।3।।
जल हो अथवा कमल-किसी भी
ठंडक से न बहलता है यह।।4।।
अक्षम हैं सब वैद्य जाँच में
अजब रोग की विपदा है यह।।5।।
कृश तन, जन पहचान न पाते।
कौन, कहाँ से आया है यह।।6।।
दिल पर खंजर रख वे कहते
'कितना गहरा जाता है यह'।।7।।
विधि, कितना भी पीड़ित कर लो
मेरा तन भी पक्का है यह।।8।।
मंजुनाथ छोड़ो समाज तक
कहता है- 'बेचारा है यह'।।9।।

(अनुवादः जया गोस्वामी)

## गीतिः-2 विवशा जिज्ञासा

विरहाऽऽपगातटमुत्तरं पुनरागमिष्यति वा न वा ?
अपि मानसी मम वेदना विषमा गमिष्यति वा न वा।।1।।
मुहुरन्तरं विमनायते बत वेदनाऽपि भृशायते।
सुचिराय ते किमियं दशा वद, निर्गमिष्यति वा न वा।।2।।
विलिखामि मानसवेदनां विसृजामि हन्त! तदन्तिके।
परमन्तरं परिशङ्कते स विलोकयिष्यति वा न वा।।3।।
अपि यासि चित्त! तदन्तिके तव सन्ति के सुहृदः सखे।
निखिले स्थले कुटिलाऽऽकुले सरलो मिलिष्यति वा न वा।।4।।
प्रहितः शरोऽस्ति शरासनान् निहितः स मे हृदये दृढम्।
अयमाहितं शरमन्तरादपसारयिष्यति वा न वा।। 5।।
नवपल्लवा विलसन्ति, संविकसन्ति ते कुसुमोत्कराः।
मम भागधेयतरुः सखे! सरसं फलिष्यति वा न वा।।6।।
अयि चन्द्रहासमिमं दधासि जहासि वक्षसि मामके।
किमवैषि? ते निशितोऽप्यसिर्मयि संचलिष्यति वा न वा।।7।।
इयमेति घोरतमस्विनी समुदेति गाढतमं तमः।
पुनरेष सौख्यदिवाकरो बत सम्भविष्यति वा न वा।।8।।
अयि मञ्जुनाथ! मनो विनोदय संगमेन सचेतसाम्।
अपि नीरसेषु जनेषु ते प्रणयो भविष्यति वा न वा।।9।।

(मञ्जुनाथः)

समच्छन्दोऽनुवादः

## मन की चिन्ता

विरह का दरिया पुनः तट से जुड़ेगा या नहीं।
मानसिक इस वेदना का रुख मुड़ेगा या नहीं।।
बुझ रहा मन, इस हृदय की पीर बढ़ती जा रही।
उठ रहा जो दर्द रह रह, वह मिटेगा या नहीं।।
सोचता हूँ मैं कि मन की वह व्यथा लिख दूँ उन्हें।
किन्तु शंकित हूँ उन्हें यह खत दिखेगा या नहीं।।
काश, कोई मित्र हो जिससे कहूँ अपनी व्यथा।
पर इस कुटिल जग में सरल सहचर मिलेगा या नहीं।।
तीर जो छोड़ा उन्होंने चुभ गया भीतर कहीं।
वो निकालेंगे इसे, यह शर हटेगा या नहीं।।
हे चाँदनी, तुम फेंकतीं चाकू हमारे वक्ष पर।
पर यह न सोचा ठीक इस दिल पर लगेगा या नहीं।।
खिल गए सब पुष्प पल्लव इस वसन्ती दौर में।
भाग्य का मेरा कभी अंकुर खिलेगा या नहीं।।
छा गया गाढ़ा अँधेरा, रात भी गहरा गई।
घोर तम में सौख्य का सूरज उगेगा या नहीं।।
सहृदयों को ही सुनाना मंजुनाथ कथा दिली।
यह सरस कविता कोई नीरस सुनेगा या नहीं।।

(अनुवादः जया गोस्वामी)

## गीतिः-3 विचित्रता

न ते जानते नेत्रयोर्वैभवं ते।
अहो! ये पयोजेन साम्यं वहन्ते।। 1।।
कलङ्केन पङ्केरुहं मौनमास्ते।
भयात् कण्टका मूलदेशे तुदन्ते।। 2।।
अमीषां कवीनां कथा दूरमास्ताम्।
इमे संभ्रमे भूरिशः कल्पयन्ते।। 3।।
भवेऽस्मिन् भवेल्लोकसृष्टिर्न दीना।
चिरादद्य पश्यन्ति यद् दर्पणं ते।। 4।।
न वातायने लोकयाऽऽताम्रनेत्रे।
बहून् संहरेदद्य दृष्टिर्ध्रुवं ते।। 5।।
सखे! पश्य जीवन्ति के ? के म्रियन्ते ?
अहो! लाक्षया रञ्जयन्ते पदं ते।। 6।।

समच्छन्दोऽनुवादः

## न ते जानते

तुम्हारे दृगों को कमल जो बताते।
करामात इनकी नहीं जान पाते।।
कमल कीच में मौन होकर पड़े हैं।
चुभे मूल में खार उनको सताते।।
वहाँ शायरों की पहुँच ही नहीं है।
न जाने कहाँ के कुलाबे मिलाते।।
उठेगी कयामत, नई सृष्टि होगी।
बहुत देर से देखते आइना वे।।
कितने जिए लोग, कितने मरेंगे।
दिखे पाँव में वे महावर लगाते।।
कि जो मर मिटे थे, पुनः जी उठे हैं।
जो देखा अदा से उन्हें मुस्कुराते।।

अये! भो! मृतांस्तूर्णमुज्जीवयाऽद्य।
करिष्यन्ति सन्तुष्य किञ्चित् स्मितं ते।। 7।।
अपूर्वैव सा वैद्यता भाति तेषाम्।
स्वयं सूदयित्वा स्वयं जीवयन्ते।। 8।।
सुखेनाऽवकृन्तेर्न खेदः सखे मे।
कथं कीलये केलिकारं करं ते।। 9।।
मदात् संलपेयुर्मदान्धा न वाऽस्मान्।
न शष्पं प्रजानन्ति ये तान्, वयं ते।। 10।।
उपेक्षां बुधाः काममद्याऽऽदधीरन्।
स्मृतिर्मञ्जुनाथस्य न स्यात् किमन्ते।। 11।।

(मञ्जुनाथः)

कहीं खिड़कियों पर न आना सुनयना।
न जाने ये चितवन किसे मार डाले।।
हृदय-व्याधियों के चिकित्सक अजब हैं।
स्वयं मारते हैं, स्वयं ही जिलाते।।
दुखी तुम करो या सुखी अब हमें मित्र।
जो कुछ करो हाथ में है तुम्हारे।।
बहुत गर्व है यदि उन्हें आज खुद पर।
हमें क्या, न हम भी उन्हें कुछ गिनाते।।
उपेक्षित अभी कर रहे हैं जिन्हें सब।
कभी मंजुनाथ याद आएँगे जाके।।

(अनुवाद: जया गोस्वामी)

---

## गीतिः-4 चित्तस्य चञ्चलता

अयि चित्त ! चिरेण विचिन्तयतोऽपि च चञ्चलता न गता न गता।
अपि नाम निरन्तरयत्नशतैस्तव निष्ठुरता न गता न गता।।1।।
कियदिच्छसि निर्भरशान्तिसुखं
न नियच्छसि पादमथाभिमुखम्।
अयि! गच्छसि साधुपदाद् विमुखं,
तव निष्क्रियता न गता न गता।।2।।
क्षणमेव विमुह्यसि वामदृशा न फलं परिपश्यसि दूरदृशा।
विमृशामि सखे! यदि तत्त्वदृशा तव कामुकता न गता न गता।।3।।
न हि साधुजनैः सह संरमसे न फलं विमलं त्वमिहाऽऽवहसे।
चपलाय सखे! यशसे यतसे, तव दुर्मदता न गता न गता।।4।।
अभिनन्दसि शास्त्रगतं न मतं न हि निन्दसि सन्ततमात्महितम्।
बत निन्दसि लोकमतं विमतं तव मत्सरता न गता न गता।।5।।
न हि दीनजनान् परितोषयसे बहु घोषयसे निजदानरुचिम्।
अयि चित्त! सखे! तव लोलुपताऽनृतकीर्तिवितान-
गता न गता।।6।।
तव विस्वरगीतिमिहाऽर्पयसे
न विलोकयसे विबुधान् विविधान्।
अधुनाऽपि च मञ्जुलनाथ मनाक्
तव दुर्मुखता न गता न गता।।7।।

(मञ्जुनाथः)

**समच्छन्दोऽनुवादः**

## न गता, न गता

हे मन, तेरी चिरचिन्तन से भी चंचलता न गई न गई
सौ यत्न किए, तुम पिघल सको, पर निष्ठुरता न गई न गई
है शान्ति अभीप्सित तुमको भी, पर विमुख रहा इस इच्छा से
सत्पथ पर चलने की तेरी यह निष्क्रियता न गई न गई
तू दृग्कमलों पर मोहित है, हे मित्र, छोड़कर दूर दृष्टि
यों तत्त्व दृष्टि से देख जरा-मन कामुकता न गई न गई
यश की तो लिप्सा है तेरी, पर साथ न साधु जनों का है
अब यत्न बिना फल-लिप्सा में तो निष्फलता न गई न गई
न तो शास्त्रमतों की शंसा की, न हि स्वार्थ-हितों की निन्दा की
तू जनहित के विपरीत चला, यह मत्सरता न गई न गई
दानी होने का दम्भ किया, पर दीनदुखी को तुष्टि न दी
फिर भी तेरी यश-कीर्ति बढ़े, यह लोलुपता न गई न गई
प्रबुधों में पंडित बनते हो और विस्वर राग सुनाते हो
अब भी मन मंजुलनाथ तुम्हारी दुर्मुखता न गई न गई

(अनुवाद: जया गोस्वामी)

पद्मावती ए कॉलोनी, जयपुरम्

पुस्तकसमीक्षाः

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# वेदविमर्शग्रन्थाः

वेदो ह्यस्माकममूल्योऽनुपमो निधिः। ''सर्वं वेदात् प्रसिध्यति'', **अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी नित्या यतः सर्वाः प्रवृत्तयः।।** इत्यादय उक्तयः सुप्रथिता विद्वत्सु। वेदा अपौरुषेया अथवा ऋषिकृताः ? नित्या अथवा अनित्याः? एवंविधा विचाराः शताब्दीभ्यः समुद्भवन्ति। विगतशताब्द्यामार्य-समानज-स्थापनाया अनन्तरं सानातिनधर्मावलम्बिनामार्यसमाजकानां च मध्येऽपि शास्त्रार्थचर्चा अभूवन्, मतभेदाः, वाद-विवादाश्चाऽभूवन्। वेदा हि प्रथममुदभवन्, तदनन्तरं सृष्टिः, अतो वेदेषु इतिहासस्यान्वेषणं भ्रान्तिरित्यार्यसामाजिकाः। सनातनिनस्तु तत्रेतिहासमपि लभन्ते। सनातनधर्मप्रवक्तृषु जयपुरीयविद्वन्मूर्धन्यस्य वेदवाचस्पतेः पं. मधुसूदन-ओझावर्यस्य विशिष्टं स्थानमस्ति।

1904-1905 ई. वर्षादिषु काश्यामार्यसामाजिक-विदुषां तदनुयायिनां च, अपरतः सनातनधर्मावलम्बिनां तदुपदेशकानां च वेदविषयकं विचारमन्थनमभूत्, खण्डनमण्डनादिकमभूत्। तस्य रोचका अभिलेखाः शतवर्षपूर्वं सुरक्षिता अक्रियन्त किन्तु प्रकाशं नाऽऽप्नुवन्। ते हि जयपुरे आयुर्वेदमार्तण्डस्वामिलक्ष्मीरामसंग्रहालये डॉ. सुरेन्द्रकुमारशर्मणा अवलोकिता यो हि जयपुरीयदादू-महाविद्यालयाख्यसंस्कृतशिक्षाकेन्द्राध्यक्षोऽभूत्। तेन सम्पादिता एते अभिलेखाः सपद्येव प्रकाशिता इति सुमहान् प्रमोदः। एतेषु वेदानां नित्यानित्यत्वविषये, पौरुषेयापौरुषेयत्वविषये च शास्त्रचर्चाः, 42 मतमतान्तराणि च स्पष्टीकृतानि। हिन्दीभाषायां विवरणमस्ति, संस्कृते मूलमुद्धृतम्। ग्रन्थस्यास्य शीर्षकमस्ति ''वेदार्थभ्रमनिवारणम्।'' डॉ. सुरेन्द्रकुमार-शर्मसम्पादितोऽयं ग्रन्थो विद्वत्सभायामेकस्यां 2 सितम्बर 2018 दिवसे लोकार्पितोऽभूत्। आइडियल पब्लिकेशन-नामकेन प्रकाशनसंस्थानेनाऽयं प्रकाशितोऽस्ति सपद्येव।

प्रकाशनसंस्थानेनाऽनेन प्राचीनभारतीयविद्या-सम्बन्धिनोऽन्येऽप्यनेके ग्रन्थाः प्रकाशिताः सन्तीति ज्ञात्वा प्रसीदेयुः पाठकाः। हिन्द्यां पुराणविद्याविशारदेन विद्वत्प्रवरेण पं. अनन्तशर्मणा विलिखिताश्चत्वारो ग्रन्थाः डॉ. सीमाशर्मणा सम्पादिताः सपद्येव प्रकाशनसंस्थानेनाऽनेन प्रकाशिताः - यथा 'संस्कृति का स्त्रोत। भारत का प्राचीनवाङ्मय', 'पुराणवाङ्मय में राष्ट्र तथा राष्ट्र की अवधारणा,' भारतीय ऐतिह्यसाक्ष्य में भारत में आर्य अभियान कल्पना मात्र तथा 'स्वेदश परिचय' इति शीर्षकवहाः। एतेषु भारतस्य सांस्कृतिक इतिहासो विवेचितोऽस्ति। आइडियल पब्लिकेशन कार्यालयो जयपुरे जौहरी बाजारस्थे मोतीसिंह भोमिया का रास्तामध्ये स्थितोऽस्ति।

**वेदार्थभ्रमनिवारणम् : सम्पादकः डॉ. सुरेन्द्रकुमारशर्मा प्रका. आइडियल पब्लिकेशन, मोतीसिंह भोमिया का रास्ता, जौहरी बाजार, जयपुर, पृ. सं. 112 मू. 200/-.**

## शोधनिबन्धसंग्रहद्वयम्

साम्प्रतिके युगे याः समस्या उद्भवन्ति तादृश्यः प्राचीने कालेऽप्युदभवन्न वेति कः कथयितुं शक्नोति? किन्तु सर्वथाऽजरामरायाः संस्कृतभाषाया यद्वाङ्मयं सहस्त्राब्दीभ्यो मानवीयजीवनस्य समग्रनिरीक्षणानन्तरं त्रिकालदर्शिभिर्मनीषिभिः सृष्टं तस्य सम्यगन्वेषणेन

सर्वविधानां समस्यानां कारणस्य, निवारणस्य च परिज्ञानं साधु सम्भवतीति सत्यस्य प्रमाणस्वरूपं गते कालखण्डेऽस्माकं देशे तादृश्यः शोधसंगोष्ठ्य आयोज्यन्त यासां विषयोऽभूत् साम्प्रतिकसमस्यानां निवारणे संस्कृत-वाङ्मयस्य कीदृशी भूमिका संभवतीति। जयपुरस्थेन राजस्थानसंस्कृतसाहित्यसम्मेलनस्थापितेन प्राच्यविद्या-पीठेन शिक्षण-प्रशिक्षण-संस्थानेन च स्वकीयानुस-न्धानकेन्द्रसमर्थितं संगोष्ठीद्वयं दिल्लीस्थस्य राष्ट्रिय-संस्कृतसंस्थानस्य वित्तीयसाहाय्येन तादृशस्यैव समस्याद्वयस्योपचारान्वेषणे संस्कृतवाङ्मयस्य साहाय्यं गवेषयितुमायोजितमासीत्। एका समस्याऽस्ति सांस्कृतिकप्रदूषणस्य (पशुहिंसा-जलवायुप्रदूषण-आतङ्कवाद-नवयुवकधृष्टतादिजनितस्य), अपराऽस्ति कन्याभ्रूणहत्यायाः।

संगोष्ठीद्वयेऽस्मिन् प्रस्तुतानां शोधलेखानां सङ्कलनद्वयमपि प्रकाशितमस्तीति सन्तोषावहम्। संस्कृतवाङ्मये वर्णितं सांस्कृतिकप्रदूषणनिवारणमिति विषये प्रस्तुतेषु शोधलेखेषु द्वौ संस्कृते, द्वौ आङ्गल-भाषायां, 47 सप्तचत्वारिंशच्च हिन्द्यां विलिखिताः। कान्याभ्रूणहत्यानिवारणे संस्कृतस्य भूमिकेति विषये प्रस्तुतेषु शोधलेखेषु त्रयः संस्कृते, द्वौ आङ्गलभाषायां, 32 द्वात्रिंशच्च हिन्द्यां विलिखिताः। ग्रन्थद्वयमिदं दृष्ट्वा विद्वांसोऽपि प्रसीदेयुः, शोधार्थिनोऽपि मार्गदर्शनं प्राप्नुयुरित्याशास्यते।

**(1) संस्कृतवाङ्मय में वर्णित सांस्कृतिक प्रदूषण निवारण (पृ.सं. 240, मू. 525/-).**

**(2) कन्या भ्रूणहत्या निवारण में संस्कृत की भूमिका (पृ.सं. 175, मू. 350/-).**

द्वयोः सम्पादकः सूरजमल गौतम, प्रधानसम्पादकः डॉ. राजकुमार जोशी, प्रकाशकम् प्राच्य विद्यापीठम्, उच्च अध्ययन एवं अनुसन्धान केन्द्रम्, राजस्थान संस्कृत साहित्य सम्मेलन, शाहपुरा बाग, आमेर रोड, जयपुर।

## काव्यरचनासंग्रहः

सुप्रथितस्य कविवर्यस्य राष्ट्रपतिसम्मानितस्य राजस्थान-संस्कृत-अकादम्या अध्यक्षचरस्य राजस्थान-विश्वविद्यालय-संस्कृतविभागाध्यक्षचरस्य डॉ. हरिराम आचार्यस्य ध्वनिनाटकानि काव्यसंग्रहाश्च संस्कृत-जगति सुविदिताः। ''मधुच्छन्दा'' ''नाचिकेतकाव्यम्'' इत्यादीनि काव्यसंकलनानि, ''पूर्वशाकुन्तलम्'' इति ध्वनिनाट्यसंकलनञ्च बहुवर्षपूर्वं प्रकाशमाप्ताः कृतयः। समये समये प्रणीतानां विविधविषयकाणां विविधशिल्प-बद्धानामस्य काव्यकृतीनां नूतनं संकलनं सपद्येव प्रकाशितं यस्य लोकार्पणं जयपुरे विद्वत्समाजे व्यधीयत।

''नैवेद्यम्'' नाम्ना प्रकाशितेऽस्मिन् काव्यसंग्रहे 41 काव्यकृतयः संकलिता यासु प्रमुखतो लयबद्धा गीतयः, गजलगीतयः, वर्षावर्णनगीतयः, राष्ट्रगीतयः, नवसंवत्सर-स्वागतगीतम् इत्यादि लयबद्ध-काव्य-कृति-संकलनं नूतनविधाया नूतनशिल्पस्य च प्रातिनिध्यं विदधाति। प्रारम्भे तिस्रो गीतयो वैदिकसूक्तानां गेयपदनिबन्धनस्य नूतनां विधां प्रदर्शयन्ति। नासदासीन्नो सदासीदित्यादि नासदीयसूक्तस्य गीतिपरिवर्तनं द्रष्टव्यम् **''नासीदसन्न सद् ब्रह्माण्डे, नैव रजो नो व्योम परं यत्। किमावार-कतत्त्वस्य छादने आसीदम्भो गहनगभीरम्?''** इत्यादि। हिन्दीभाषायां सुप्रथिताया लक्ष्मीनीराजनगीतेः समच्छन्दोऽनुवादोऽपि द्रष्टव्यः **''जयलक्ष्मीमातः जय जय लक्ष्मीमातः। वन्देऽहं पदयुगलं तव सायं प्रातः।''**

राजस्थाने वृक्षाणां रक्षणाय विश्नोईत्याख्यसंप्रदायस्य इमरतीत्याख्याया वन्द्यमहिलया यदान्दोलनं, य

आत्मोत्सर्गः कृतोऽभूत् सा ''अमृता'' देवीति नाम्ना प्रसेधिता महिला देशे स्मर्यते सर्वदा। तस्यै समर्पितैका गीतिः ''अमृता-कथा'' नाम्ना। एकस्यां गीतावस्मिन् प्रवञ्चनयुगे कथं जनाश्छद्ममुखावरणावृता विचरन्तीत्यस्याः स्थितेरित्थं प्रकटनं कृतमस्ति ''**आनय सुमुखि मुखावरणं मे, मया बहिर्गमनीयम्।**'' इत्थं हि समये समये विलिखिताः काव्यरचनाः संग्रहेऽस्मिन् द्रष्टुं शक्यन्ते। एतासु कतिपया आकशवाणी-केन्द्रादिभ्यः प्रसारितचरा अपि सन्ति। नूतनस्यास्य कृतिसंग्रहस्य प्रकाशनोपलक्ष्ये वर्धाप्यते कविवर्यो डॉ. हरिराम आचार्यः।

**नैवेद्यम् (काव्य-प्रसून-स्तबकम्) कविः डॉ. हरिराम आचार्यः प्रकाशक राजीव आचार्यः, चिरमी प्रकाशन 42 ए पर्णकुटी, गंगवाल पार्क जयपुरम् पृ.सं. 75 मू. 250/-.**

# यूयम्

❑ **डॉ. हर्षदेवमाधवः**

कालिदासो मूर्ख आसीत्।
यस्यां शाखायां स उपविष्टस्तामेव
स चिच्छेद - इति प्रसिद्धिः।
किन्तु
यूयं तु बुद्धिमन्त -
स्तथापि
यूयं प्रज्वालयथ
तदेव बसयानं
यत्प्रतिदिनं वः सेवां कुरुते,
यूयं दहथ
तमेव विद्यालयं
यत्र पठन्ति वो बालकाः।
तान् आपणान् नाशयथ
ये ददति
जीवनावश्यकवस्तूनि,
तान्येव पुलिसस्थानकानि
भस्मसात् कुरुथ,
येषां पुलिसदलं
सेवते युष्मान्।
धर्मान्धा यूयं
घ्नथ तान् एव सैनिकान्
ये प्राणान् समर्प्य
मातृभूमिं रक्षन्ति .... ।
सर्वकारो नार्जनं करोति
एकस्यापि रूप्यकस्य,
न करोति श्रमं
धनार्थम्,
यल्लुण्ठ्यते, दह्यते, प्रज्वाल्यते
तत्सर्वमपि सर्वकारस्य नासीत्-
नास्ति वा....।
तर्हि
भ्रातरः ! भगिन्यः !
ये कुठाराघाताः कृताः
ते केषां पादोपरि कृताः ?
शृणुत क्षणम् -
यः स्वस्य शाखां छिनत्ति
स तु मूर्खः,
किन्तु
यो विचारशीलः
छिनत्ति स्वशाखां
स न मूर्खः, स तु महामूर्खो राक्षसश्च।

**8, राजतिलक बंग्लोज, आबादनगरम्,**
**बसस्टोप के पास, बोपल, अहमदाबाद-380058**

'पद्मावत' चित्रपटप्रदर्शनावसरे विरोधाय जनता-नाश-लीलां वीक्ष्य

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- **अष्टात्रिंशः प्रसङ्गः**

# अन्वेषणीयं जीवनचरित्रम्

❑ वेणीमाधव गो. धर्माधिकारी

**क्रमशः**

यद्यपि रामशङ्कराभिधैरग्निहोत्रिभिरतिपरिश्रमेण बुद्धिकौशलेन च बाबामहोदयानां सर्वमपि जीवनचरित्रं पूर्ण रूपेण संकलितमस्ति। नास्ति तत्रान्वेषणस्यावश्य-कता। यदनुसारमतिगुप्तमपि तेषां जीवनं सुसज्जितं प्रकटितं भवति।

बाबामहोदयानां नाम उमाकान्त आप्टे इत्यासीत्। तेषां पितृचरणाः केशवाख्याः कारंजानगरे अध्यापका आसन्।ज्येष्ठा भगिनी मथुराबाई नाम्ना विख्याता ''वणी'' स्थाने अध्यापिकाऽऽसीत्। पश्चात् झांसी नगरेऽपि निवसति स्म। कनीयान् भ्राता उदयपुरे निवसतिस्म। बाबा-महोदयानां जन्म समयः 1900 ई., 1901 ई. वा आसीत्। यतः तेषां मृत्युः 1972 वर्षे 72 वर्षात्मके वयसि वर्णितः। प्रभावकारिघटनया च ते राष्ट्रसेवायामेव संलग्नाः। पारिवारिकं जीवनमतिकठोरभावेन विस्मारितम्। एवं च तेषां स्वभावादिकमपि प्रसङ्गेन वर्णितमेव। द्राक्तर हेडगेवारमहोदयैः परिचयानन्तरमेव ते संघसमर्पितजीवनाः समभवन्। इत्यादि सर्वमपि तेषां सकलनकार्येण ज्ञायते। अथापि तेषां कार्याणामनुभवास्तु पूर्णरूपेण ज्ञातुमशक्यतयैव वर्णिताः; सत्यमप्यस्ति। ते हि घोषणां विनैव संघकार्यप्रचारार्थमितस्ततोऽभ्रमन्। सम्पूर्णेऽपि भारते ते वर्षे द्विवारं भ्रमणमकुर्वन्। अतः कार्यानुभवस्य सम्पूर्णमपि वर्णनमसम्भवमित्येव तैः वर्णितम्।

ते हि लिखन्ति स्व. बाबामहोदयाः लेखकाः चिन्तकाः अध्ययनशीलाः जिज्ञासवः, पण्डिताः वक्तारः एवं बहुविशिष्टगुणाः आसन् परं मुख्यरूपेण सर्वाधिकं ते संघकार्यकर्त्तारः आसन्। तैः स्वस्य समग्रप्रतिभाशक्तीनां नियोजनं समर्पणञ्च संघस्य निष्ठावति स्वयंसेवकत्वे कठोरतापूर्वकं कृतमासीत्।

परमपूजनीयानां द्राक्तरहेडगेवारमहोदयानां सम्पर्के तेषां राष्ट्रसमर्पिताय तेजस्विने व्यक्तित्वाय संघकार्यस्य दिशा सम्प्राप्ता। ते घोषणां विनैव संघकार्यविस्ताराया-भ्रमन् सम्पूर्णेऽपि भारते। अनन्तरं च ते बौद्धिकप्रमुखाः प्रचारकाः प्रमुखाश्चाभवन्। अन्तिमश्वासपर्य्यन्तं तैः दायित्वनिर्वहनं कृतम्। परमपूजनीयानां गुरूणां गोलवलकरमहाभागानामनन्तरं त एव सम्पूर्णेऽपि भारते भ्रमणकर्त्तार आसन्। सहस्रलक्ष-कोटिभ्यो हिन्दुभ्यः स्वयंसेवकेभ्यश्च तेषां मार्गदर्शनं सम्प्राप्तम्। देशस्य सर्वाभ्यः शाखाभ्यः स्वयंसेवकेभ्यः सततं तेषां स्नेहो मार्गदर्शनं प्रेरणाश्च सम्प्राप्ताः।

तेषां जीवनसम्बद्धानां संस्मरणानां संकलनं कर्तुं तैस्तुल्यमेव सम्पूर्णेऽपि भारते भ्रमणं करणीयं भवेत्। एतादृशोऽवसरः प्राप्तुमशक्य एव। अतो यत् किमपि प्राप्तं तेनैव सन्तोषो विधेयः। संस्मरणानां संकलने चयने चापीदमवधेयं भवति यत्तेषां जीवनेन कार्येणैव च संबद्धानां संकलनं स्यात्। ते स्वस्य सम्पूर्णेऽपि जीवने किशोराणां तरुणानां च स्वयंसेवकानां विकासाय पूर्णावधानेन संलग्ना आसन्। तेषां सर्वासां कृतीनां केन्द्र-बिन्दुरिदमेवासीद् यत् किशोराणां तरुणानां च जीवनं तेजस्वि भवेत्। अत एव संस्मरणानां संकलनमिदं विचारं चिन्तयित्वैव कृतं येन शाखानां कार्यवाहकेभ्यः मुख्य-शिक्षकेभ्यश्च कार्यविस्तारार्थं कठिनाचरणस्य प्रमाणे पुष्टा सामग्री प्राप्ता भवेत्। स्वस्य किशोरतरुणसहयोगिभ्यः विकासाय कियान् परिश्रमः कियती सावधानता पवित्रता

च स्वाचरणे विधेया भवति, कियन्तो गुणाः स्वीयजीवने उत्पादनीयाः भवन्ति, स्वभावमाधुर्येण, व्यवहार-कुशलतया च सह प्रत्येकस्मिन्नवसरे घटनायां परिस्थितौ च विवेकपूर्णमाचरणं विधेयं भवति, एकैकस्मै सहयोगिनः कृते कथं कथं रात्रिं-दिवं मित्रतां स्थापयितुं सत्या तत्परता आवश्यकी भवति, कथं च विनोपदेशं तद्दोषनिराकरणं गुणवृद्ध्यर्थं च प्रयत्नशीलेन भाव्यमित्या-दिकं तेभ्यः संस्मरणेभ्यः प्राप्तं भवति।

एवं च पारिवारिक जीवनेऽपि दशमकक्षापर्य्यन्त-मेवाध्ययनवर्णनेन पश्चाच्च बीमाकार्यालये टंकणकपदे नागपुरे कार्यकरणेन परिवारपरित्यागसमयोऽनुमातुं शक्यः। 26-7-72 दिने द्विसप्तविर्षात्मके वयसि महाप्रयाणवर्णनेन 1900-1901 वर्षे जन्म ज्ञातं भवत्येव। अथापि तैर्न किमपि वर्णितम्। कठोरतापूर्वकं च तद्-विस्मरणस्य प्रयासः कृतः। स्मरणस्य संघकार्ये बाधकत्वात्। स्वयंसेवकैः पृष्टेऽपि ते क्रोधेन संघे आगमानात्पूर्वं धूलिभक्षणं कृतं, तेन ज्ञातेन किमित्येव कथयन्तिस्म। संघकार्ये प्रवेशात्पूर्वमपि छात्रमण्डलादि-निर्माणं राष्ट्रसेवैवासीदित्यलमतिविस्तरेण।

**बाबामहोदयानां व्यक्तित्वं तत्त्वचिन्तनं कृतित्वञ्च।**
**सर्वं वर्णितमत्र विरला हि तादृशाः सन्तः।।1।।**
**अष्टैक शून्यद्विमिते ईशवीये शुभेदिने।**
**कार्तिके पूर्णिमायाञ्च ग्रन्थोऽयं पूर्णतां गतः।।2।।**

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** **सप्ततितमः प्रसङ्गः**

# श्रम एव स्वास्थ्यहेतुः

❑ **श्रीमती आराधना धर्माधिकारी**

चन्द्रपुरस्य राजा कुमारसिंहः (कंवरसिंहः) आसीत्तस्मै न कस्यापि पदार्थस्य न्यूनताऽभूतः। तथापि तत्स्वास्थ्यं वरीयोनाऽऽसीत्। रोगाणां प्रभावेण स पीडितश्चिन्तितश्चासीत्। पार्श्ववर्त्तिनां बहूनां चिकित्सकानां चिकित्सा स्वीकृता परं न कोऽपि लाभः समभवत्। दिने दिने राज्ञः स्वारथ्ये पतनमेवाभूत्। यदा नगरे वार्तैषा प्रसृता तदा नगरस्यैको वृद्धजनो राज्ञः समीपे आगत्याब्रवीत्। राजन्! भवदुपचारार्थं मह्यमनुमतिर्देया। राज्ञः अनुमतिं प्राप्य स अब्रवीत्-भवता कस्यापि पूर्णसुखिनः कञ्चुकं परिधार्यताम् अवश्यमेव स्वस्थो भविष्यति। वृद्धजन-स्य वार्त्तां श्रुत्वा राजसभायां सर्वे अहसन्। परं राज्ञा विचारितम् इयन्त उपचाराः कृतास्तदा एकोऽयमपि करणीयः। राज्ञा पूर्णसुखिनं जनमन्वेष्टुं दूताः प्रेषिताः परं न कोऽपि पूर्णसुखी मिलितः। प्रत्येकस्य गेहे केनचित् कारणेन पीडा आसीदेव। अन्ते राजा स्वयं पूर्णसुखिनमन्वेष्टुं निस्सृतः। बव्हन्वेषणानन्तरं राजा एकस्मिन् क्षेत्रे सम्प्राप्तः ज्येष्ठमासस्य तीव्रे आतपे एकः कृषकः स्वक्षेत्रे निश्चिन्तो गीतानि गायन् कार्य कुर्वन्नासीत्। तस्य वदने प्रसन्नता भासतेस्म। राजा कृषकमपृच्छत् बन्धो! अतीव प्रसन्नो लक्ष्यसे? किं त्वां न किमपि दुःखम्?

कृषकोऽब्रवीत्-ईशाकृपया मह्यं न किमपि दुःखम्। श्रुत्वैव राजा अतीव प्रसन्नोऽभवत्। मे मनःकामनात्र पूर्णा भविष्यति। राज्ञा तस्य कञ्चुकं याचितुं मनः कृतम्, परं तस्य देहोपरि दृष्टिपाते कृते कञ्चुकं तु तत्र नासीदेव। तस्य शरीरावरणं तु तच्छरीरजः स्वेद एव।

राज्ञावगतं वस्तुतस्तु परिश्रमेणैव कृषकः सुखी नीरोगश्चास्ति। अधुना राज्ञापि विलासपूर्णं जीवनं त्यक्तम्। परिश्रमकरणस्य च संकल्पः कृतः। कतिपय-दिनानन्तरमेव स स्वस्थो नीरोगश्चाभवत्।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

बालोपयोगिनी जीवनवृत्तमाला

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

हिमालयस्य एकस्मिन् पवित्रे गुहामध्ये यदा नारदः भगवत्स्मरणे समाधिस्थ आसीत्तदा समाधिस्थं नारदं विलोक्य भीतेन इन्द्रेण चिन्तितं यद् इन्द्रासनं प्राप्तुकामः एष समाधिनिमग्नो वर्तते। कामदेवं आहूय तेनादिष्टम् यत् 'नारदस्य समीपं गत्वा तं समाधेः विचलितं कुरु'। वसन्तादिकैः स्वसहचरैः सह कामदेवः नारदसमीपमागत्य तस्योपरि स्वपञ्चशरपातं चकार। अतिविस्मितेन कामेन दृष्टं यत् तस्य क्रीडाकौतुकस्य पञ्चशरपातस्य लवमात्रोपि परिणामो नारदोपरि न जातः तदा भयभीतेन कामेन विचारितं यद् यस्य रक्षकः स्वयं चक्रपाणिः गदाधरो वर्तते तस्य अनिष्टं कर्तुं कः समर्थः। पराजितः कामदेवः नारदसम्मुखमागत्य क्षमां ययाचे।

नारदमुनिः इमं कामदेवपराभवं विलोक्य गर्वितोऽभूत्तेनानुभूतं यत् सः कामजयी अस्ति। नारदः हिमालयगुहायां शिवस्य समीपं आगत्य तं च सविस्तरं कामजयस्य वृत्तान्तं कथयामास।

इदं सर्वं वृत्तमुपश्रुत्य शिवः नारदमुवाच 'यदिदं कामपराभवस्य विवरणं भवता न कथनीयं कस्यापि सम्मुखमिति'। किन्तु नारद अनेनोपदेशेन सन्तुष्टो न जातः। एकदा तेन इदं सर्वं वृत्तं भगवतः विष्णोः सम्मुखमपि कथितम्। भगवता विष्णुना नारदस्याभिमानं निर्मूलयितुं स्वमाया प्रेरिता।

अनतिदीर्घसमयानन्तरं एकदा परिभ्रमन् नारदः शीलनिधिराजस्य राज्ये अगात्। तस्य राज्ञः विश्वमोहिनीति नाम्ना अतीव रूपवती कन्या आसीत् राज्ञा तस्याः कन्यायाः स्वयम्वरो रचितः। विभिन्नदेशीयाः नृपतयः तत्रोपस्थिता आसन्। नारदस्यागमनं विलोक्य तेन नृपतिना तस्य अत्यधिकः सत्कारः कृतः। राजकन्याया अनुपमं रूपलावण्यं विलोक्य नारदमुनेर्वैराग्यं विलुप्तमभूत्। नारदः तस्या राजकन्यायाः वरणं कथं स्यातदि इति विचारचिन्तनेन चिन्तितोऽभूत्। भगवतः विष्णाः पुनः 2 चिन्तनं कृत्वा नारदेन तस्य विष्णोः सकाशात् हरिरूपम् याचितम्। प्रकटितो भगवान 'अहं तव हितमवश्यं करिष्ये' इति निगद्य अन्तर्दधौ। हरेः निगूढं वाक्यार्थं अनधिगत्य नारदः सुप्रसन्नः हरेः (वानरस्य) रूपं धृत्वा स्वयम्वरं जगाम। तं वानररूपधारिणं नारदं विलोक्य जनाः चकिताः बभूवुः। यदा राजकन्या नारदस्य समीपमागता तदा कुपितया तया करस्थिता सा वरमाला समीपस्थस्य नृपतेः गले समर्पिता। सः भूपतिः स्वयं भगवानेवासीत्।

अत्यधिकं निराशायुक्तं नारदं विलोक्य शिवस्य गणौ मंदहास्यं कृतवन्तौ तमूचतुः 'मुनिवर ! दर्पणे निजमुखाकृतिं विलोकय' नारदेन सरोवरजले स्वमुखाकृतिः विलोकिता। स्वस्य वानराकृतिं विलोक्य स अत्यधिकक्रुद्धो बभूव। तेन शिवगणेभ्यः भाविजन्मनि असुरयोनौ जन्म प्राप्स्यथः इति शापः दत्तः।'

किञ्चित्कालानन्तरं पुनः तेन स्वमुखाकृतिर्जले विलोकिता तदा यथापूर्वं मुनिस्वरूपं तेन दृष्टम्। किन्तु नारदमुनेः क्रोधः शान्तो न जात आसीत्। क्रोधाविष्टो नारदः भगवत्सकाशं गन्तुमुद्यतोऽभूत्। स सम्मुखे नृपतिरूपधारिणं विष्णुं विलोक्य कोपाविष्टो

**नारदः तमपि 'त्वं कपटाचरणपटुः। मानवशरीरेण त्वयाऽहं वञ्चितोऽस्मि अनेन त्वमपि मानवदेहधारी भविष्यसि। त्वया मम वानराकृतिः कृता अतः वानरा एव तव सहयोगिनो भविष्यन्ति। तेष्वेव तव निवासो भविष्यति। स्त्रियाः कृते त्वया दुःखितोऽहम् कृतः अतः त्वमपि स्त्रीवियोगेन दुःखितो भविष्यसि'। इति।**

**भगवान् इमं शापं स्वीकृतवान् नारदस्य शरीरात् तेन निजा मायाऽपि अपसारिता। मायाया अपसरणात् नारदस्य मोहदशाऽपि विलुप्ता बभूव। स्वस्थेन नारदेन यथा स्वशापादिकृतं दुष्कृत्यं विचारितं तदा स तत्क्षणमेव प्रभोः चरणेषु प्रणिपत्य क्षमायाचनां चकार। 'भगवतः शङ्करस्य शतनामजपेन तव चित्तं शान्तं भविष्यति' इति विष्णुना निर्दिष्टः नारदः सुतोषितः। नारदस्य अनेनैव शापेन भगवता रामावतारमिषेण नरदेहधारणं कृतम्, सीतायाः वियोगोऽपि च धारितः'।**

**नारदेन निष्प्रयोजनं कस्याप्यहितं न कृतम्। शान्तेः स्थापनार्थमेव तेन सर्वः प्रपञ्चसमूहो रचित आसीत्। इति।**

## हिन्दी में

हिमालय की एक पवित्र गुहा में जब नारद भगवतस्मरण करते हुए समाधिस्थ थे तो समाधिस्थ इन नारद को देख कर भयभीत इन्द्र ने विचार किया कि इन्द्रासन प्राप्त करने की कामना से ये समाधि में निमग्न हैं। कामदेव को बुलाकर उसने आदेश दिया कि नारद के समीप जाकर उनको समाधि से विचलित करो। वसन्त आदि अपने सहचारों के साथ कामदेव ने नारद के समीप आकर उनके ऊपर अपने पांच बाण का आघात किया। अत्यन्त विस्मित हुए कामदेव ने जब यह देखा कि उसके क्रीडा कौतुक का तथा पञ्चशर के (बाण के) छोड़ने का लवमात्र भी परिणाम नारद ऋषि पर नहीं हुआ तब भयभीत कामदेव ने सोचा कि जिसके रक्षक स्वयं चक्रपाणि गदाधर हैं उसका अनिष्ट कौन कर सकता है।

नारद मुनि इस कामदेव के पराभव को देखकर गर्वित हो गए। उनने अनुभव किया कि वे कामदेव को जीतने वाले हैं। नारद ने हिमालय की कन्दरा से शिवजी के समीप आकर उनको विस्तार पूर्वक कामदेव को जीत लेने का वृत्तान्त सुनाया।

इस सारे वृत्तान्त को सुनकर शिवजी नारदजी को बोले कि इस कामदेव के पराभव का विवरण आप अन्य किसी के सम्मुख न कहें। किन्तु नारद इस उपदेश से सन्तुष्ट नहीं हुए। एक दिन उनने इस सारे वृत्तान्त को भगवान् विष्णु के सम्मुख भी कहा। भगवान् विष्णु ने नारद के अभिमान को निर्मूल करने के लिए अपनी माया को प्रेरित किया।

थोडे समय के पश्चात् एक दिन भ्रमण करते हुए नारद शीलनिधि राजा के राज्य में पहुँचे। उस राजा के विश्वमोहिनी नाम की अत्यन्त रूपवती कन्या थी। राजा ने कन्या का स्वयंवर रचा। विभिन्न देशों के राजा वहां उपस्थित थे। नारद के आगमन को देखकर राजा ने उनको अत्यधिक सत्कार किया। राजकन्या का अनुपम रूप लावण्य देखकर नारदमुनि का वैरारग्य विलुप्त हो गया। नारद उस कन्या का वरण कैसे हो इस विचार चिन्तन से चिन्तित हो गए। भगवान् विष्णु का पुनः पुनः चिन्तन करके नारद ने विष्णु से हरिरूप मांगा।। भगवान् ने प्रगट होकर 'मैं तुम्हारा हित अवश्य करूंगा' यह कह कर वे अन्तर्ध्यान हो गए। हरि का निगूढ वाक्यार्थ न समझकर नारद प्रसन्न होकर हरि का (वानर का) रूप धर कर स्वयंवर में गए। उन वानर रूपधारी नारद को देखकर

लोग आश्चर्य चकित हो गए। जब राजकन्या नारद के समीप आई तो क्रोधित होकर उसने वह हाथ में स्थित वरमाला समीप में बैठे राजा के गले में डाल दी। वह राजा स्वयं भगवान् ही थे।

अत्यधिक निराशायुक्त नारद को देखकर शिव के दो गणों ने मंद हास्य करते हुए कहा, मुनीश्वर ! दर्पण में अपनी मुखाकृति देखो ! नारद ने सरोवर के जल में अपनी मुखाकृति को देखा। अपनी वानराकृति देख कर वे अत्यधिक क्रुद्ध हुए। उनने शिवगणों को 'आगे के जन्म में असुर योनि में जन्म लोगे' यह शाप दिया।

कुछ समय के पश्चात् फिर से उसने अपनी मुखाकृति जल में देखी तो पूर्व जैसा मुनि स्वरूप उन्हें दिखा। किन्तु नारदमुनि का क्रोध शान्त नहीं हो रहा था। क्रोध के आवेश में नारद भगवान् के सामने जाने को उद्यत हुए। उनने (नारद ने) अपने सम्मुख ही राजा का रूप धरे विष्णु को छोड़कर क्रुद्ध नारद ने उनको भी 'तुम कपटा-चरण मे ंपटु हो, मानव शरीरधारी तुम्हारे द्वारा में ठगा गया हूँ। अतः तुम भी मानव देहधारी बनोगे। तुमने मेरी वानर की मुखाकृति की। अतः वानर ही तुम्हारे सहयोगी होंगे। उनमें ही तुम्हारा निवास होगा। स्त्री के कारण तुम्हारे द्वारा मैं दुःखित किया गया हूँ इसलिये तुम भी स्त्री वियोग से दुःखित होंगे।'

भगवान् ने यह शाप स्वीकार किया और नारद के शरीर से उनने अपनी माया को हटा दिया। माया के दूर होने से नारद की मोहदशा भी विलुप्त हो गई। स्वस्थ नारद ने जब सारे शापादि द्वरा किये दुष्कृत्य का विचार किया तब पैरों में गिरकर क्षमा याचना करने लगे। भगवान् शङ्कर के सौ नाम जपने से तुम्हारा चित्त शान्त हो इस प्रकार विष्णु द्वारा निर्देश करने पर नारद सन्तुष्ट हुए नारद के इसी शाप से भगवान् को रामावतार के मिष से नरदेह धारण करना पड़ा और सीता का वियोग भी सहना पड़।

नारद के निष्प्रयोजन कुछ नहीं किया। उनने सारा कार्य शान्ति स्थापित करने हेतु ही किया।

**किशनपोल बाजारः, जयपुरम्**

# सूक्ति-सुधा

**❑ डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**औषधयो मुनीनां स दत्ते पुण्यकरं बुधः।**
**देवलोके सुखं भुक्त्वा कर्मरोगादिकं क्षिपेत्।।**

– जो बुद्धिमान-मुनियों के लिये पुण्यकारी औषधी देता है, वह देवलोक में सुख भोगकर कर्मबन्ध रूपी रोगादि को क्षय (नष्ट) करता है।

**सर्वजीवेषु यो दत्ते अभयं सत्वसौख्यदम्।**
**स संसारसुखं प्राप्य स्थानं गच्छति निर्भयम्।।**

– जो सब जीवों को सुखदायक अभय प्रदान करता है, वह सांसार के सुख को प्राप्त कर निर्भय (निराकुल) स्थान को प्राप्त करता है।

**किं जीवितेन कृपणस्य धनेन लोके,**
**पूजादिदानरहितस्य च वार्द्धकस्य।**
**पापस्य तस्य पुरतो बहुरोगशोक-**
**क्लेशादि दुःखसहिता कुगतिर्ध्रुवं स्यात्।।**

– ऐसे कृपण मनुष्य के जीवन और धन से क्या प्रयोजन है? जो पूजा (भगवद्भक्ति) से रहित और धन की वृद्धि में रत रहता है, आगे चलकर उस मनुष्य की पाप के कारण बहुत रोग शोक क्लेशादि दुःख सहित कुगति होती है।

**वरं द्ररिद्रं न च दानहीनं धनं महामोहकरं दुरन्तम्।**
**पापस्य बीजं नरकस्य हेतुर्दुःखाकरं दुर्गतिदानदक्षम्।।**

– दरिद्र होना अच्छा है, परन्तु दानहीन होना अच्छा नहीं। धन तो महामोह करने वाला दुष्परिणाम है, पाप का बीज, नरक का हेतु है, दुःखो की खान है और दुर्गति को देने में दक्ष-कुशल है।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# राजर्षेः सन्त-पीपावर्यस्य सामाजिकी चेतना

❑ ललित शर्मा

वीरतायाः अभिव्यक्तेः माध्यमं केवलं युद्धकरणं नास्ति अपितु एषा अभिव्यक्तिः जनसेवया सत्यभक्तिसाधनया विशालसामाजिक-चेतनयैव भवितुमर्हति। पश्चिम-भारतस्य मध्ययुगीने भक्तिकाले महान् समाजसुधारकः साधुः पीपा स्वस्य सेवया चेतनभावनया च एतत् सिद्धं कृतवान् यत् समाजस्य सुधारस्य कर्ममयी भावना कीदृशी भवितुमर्हति। सा ईदृशी स्यात् यस्याः करणेन जनः सर्वदा कालकर्मशत्रूणां कृते अपराजितः भवेत्।

राजस्थानस्य झालावाड़ जनपदमुख्यालयस्य समीपे आहूकालीसिन्ध-नद्योः संगमस्थले प्राचीनजलदुर्गः गागरोनः निर्मितः अस्ति। एषः सन्तपीपायाः जन्मस्थानं शासनस्थलं च आसीत्। पीपा खींची-राजवंशस्य एकच्छत्रः शासक आसीत्। आहू कालिसिन्धनद्योः संगमस्थले तस्य भक्तिसाधनायाः गुह्यस्थलं समाधिस्थलं दीर्घाश्रमो मन्दिरं च विद्यते। तस्य जन्म चतुर्दश शताब्द्यां गागरोनस्य खींची चौहानराजवंशे अभवत्। सोऽस्य राज्यस्य वीरो धीरः कुशलः शासक आसीत्। यदा पीपा शासक आसीत् तदा शत्रुभिः साकं युद्धं कृत्वा विजयं प्राप्तवान् किन्तु युद्धोन्मादैः कृतां हत्यां रक्तपातं च दृष्ट्वा सः गागरोनराज्यस्य शासनं शस्त्रं च त्यक्तवान्। तत्पश्चात् सः वाराणसीनगरीं गत्वा स्वामिरामानन्दस्य शिष्यः अभवत्। एषः कबीर, रैदास, धन्ना सेनैः साकं शिक्षां गृहीत्वा तेषां गुरुभ्राता जातः।

सतः पीपावर्यस्य जीवनचरित्रं देशस्य महत्सु समाजसुधारकेषु सर्वोत्कृष्टमस्ति। तस्य समाजसुधारस्य सुन्दरविचारधारायाः अद्वितीयकर्म-भावनाया-श्च कारणाद् एव सोऽनेकेषां भक्तानां आदर्श महापुरुषो बभूव। महाराजस्य पीपावर्यस्य पत्न्या सीतयाऽपि राजस्थाने भक्तेः समाज-सुधारचेतनायाश्च जागरणस्य विलक्षणं कार्यं कृतम्। तया उत्तरभारतस्य सन्त-जनेभ्यो राजस्थानस्य गागरोन-नगरे आगमनस्य निमन्त्रणं दत्तम्। स्वामी रामानन्द, कबीर, रैदास, धन्नाऽऽदीनां अनेकेषां साधुवर्याणां धर्मयात्रासंघानां च प्रथमवारं राजस्थानस्य भूमौ आगमनमभवत्। युद्धेषु धर्माडम्बरेषु भेदभावेषु च पतितेषु राजस्थानराजकुलेषु भक्त्याः समाजसुधारस्य एका महती क्रान्तिचेतना आनीता। पीपा सीतासहचरी च द्वावपि तदा स्वस्य राज्यं वैभवं त्यक्त्वा गागरोनतः गुजरातपर्यन्तम् सन्तजनानां धर्मयात्रायाः नेतृत्वम् अकुरुताम्। तत्र परदुःखकातरतां परव्याधिपीड़ां च सन्तप्तां वैष्णव विचारधारां जनानां कृते समान-भावैः प्रचारयतः स्म। तत्कालीने समये गुजरात प्रदेशस्य सुप्रसिद्धः भक्तः नरसी मेहता तया विचारधारया अत्यधिकं प्रभावितः। **''वैष्णव जन तो तेने कहिये जे पीर पराई जाणै रे''** एतत् पद्यं लिखितवान् एतेन महात्मागान्धिनः जीवने अपि प्रेरणा दत्ता या सुविदिता।

भक्तशिरोमणिः मीरा बाई सन्त-पीपावर्यस्य भक्तिसाधनया पूर्णरूपेण प्रभाविता आसीत्। तदा एव तया लिखितम् **''पीपा को प्रभु परच्यों दीन्हों, दियो रे खजानो पूर।''** भक्तमालायाः लेखनस्य परम्परायाः प्रर्वतकः नाभादासः पीपावर्यस्य उदात्तं जीवनंचरित्रं देशे सर्वप्रथमं ''छप्पय'' इत्यस्य रचनां कृत्वा लिलेख, तस्मै बृहत् सम्मानं च दत्तवान्।

मध्यकाले देशस्य सामाजिकी स्थितिः विषमतापूर्णा अभवत्। सेवकाः स्वामिनं पीडितवन्तः। धर्मः भक्तिः सज्जनता च रसातलं प्रति गतवन्तः। पण्डिताः मठाधीशा अभवन्। दुर्जनाः सज्जनान् पराभूतान् कृतवन्तः। वर्णेषु जातिवर्गेषु च भेदोऽभवत्। अधमोत्तमस्य जनस्य कोऽपि अन्वेषको नासीत्। अस्मिन् समये विशेषरूपेण स्वस्य गुरोः रामानन्दस्य आज्ञया शिष्यः पीपा पश्चिमभारतं सम्भालयति स्म। स्वस्य भक्ति-साधनया आत्मविश्वासेन, साहसेन, निर्भीकतया च सह पुरातनीं रूढ़ि-मान्यतामव-धारणां च ताडयित्वा समाजे चेतना-जागरणे तेन महत्वपूर्णा सफलता प्राप्ता। सः पूर्णसमर्पितभावेन

सपत्नीकः ग्रामेषु वीथीषु च पदातिरेव भ्रमित्वा ब्रह्मज्ञानस्य नैतिक-समन्वयभावस्य च जागरणं कृतवान्। एतत् तस्य विचारैः वाग्भिश्च प्रमाणितं भवति। निम्नांकित-बिन्दूनां साहाय्येन वयं तस्य सामाजिकी-मन्तश्चेतनां द्रक्ष्यामः।

**1. जाति-पाँति-विषयस्य खण्डनम् :-**

संतपीपावर्यो जीवमात्रस्य समानतायाः प्रबलरूपेण पक्षधर आसीत्। तस्य मतानुसारम् ईश्वरस्य समक्षं सर्वप्राणिनः समाजे समानाः सन्ति। ईश्वरस्य राज्ये ज्येष्ठेषु कनिष्ठेषु भिक्षुकेषु च कोऽपि भेदभावो नास्ति। तस्य वाचः प्रमाणमित्थं निर्गच्छन्ति।

**''सन्तों एक राम सब माँही**
**अपने मन उजियारो। आन न दीखे काही ( टेक )**
**एकै धाम रुचिर अर सांसा। छौटे मोटन माँही।।**
**एकै मारग में सब माया एकै मारग माँही।।''**

सः मन्यते यत् विप्राः शूद्राश्च सर्वे एकेन मार्गेण आगतवन्तः। सर्वेषां पितरावपि समानावास्ताम् तर्हि भेदभावः किमर्थम्? किन्तु सः एतस्याः वार्तायाः प्रकटीकरणं केवलं वैचारिके धरातले न कृतवान् अपितु एतस्याः क्रियान्वयनं कृत्वा दर्शितवान्। तस्य उदाहरणं एवमस्ति, दौसा-जनपदे एकदा स रंगजी नामकस्य भक्तस्य गृहे आसीत्। तदा गोमयस्य अन्वेषणाय द्वे शूद्रस्त्रियौ तत्र आगतवत्यौ। महात्मा पीपा ते आहूय समीपे उपावेश्य अकथयत्। युवाम् मानव-शरीरं प्राप्य अपि अस्य दुरुपयोगं कुरुथः येन शरीरेण दिव्यस्नेहरत्नरूपिणो धनस्य संचयः कर्तुं शक्यते तेन भवत्यौ गोमयादि सांसारिक विषयाणां संग्रहं कृतवत्यौ? युवाम् स्वस्य सर्वम् ईश्वरस्य भक्त्यै अर्पयित्वा दत्ताम्। पीपामहाराजस्य उपदेशानां प्रभावः तयोः महिलयोः मनसि अभवत्। ते सर्वं व्यक्त्वा भक्तिमार्गे अग्रसरे अभवताम्।

एषा घटना पीपावर्यस्य जाति-पाँति-विषय-खण्डनस्य, समन्वय-सिद्धान्तस्य च क्रियान्वयनं प्रकटीकरोति। एष हि तत्कालीन-समाजे अद्वितीय समाजोत्थानस्य समन्वयस्य च विचार आसीत्।

**2. मूर्तिपूजां प्रति अविश्वासः**

तस्य मान्यता आसीत् यत् यदा ईश्वरः समाजस्य सर्वेषु प्राणिषु व्याप्तः अस्ति, तदा एतादृश्यां दशायां कः कस्य त्यागं कुर्यात् कस्य पूजां च। तस्य चिन्तनमासीत् यत् या मूर्तिः स्वयमेव नश्वरा तस्य पूजा कथं भवितुम् अर्हति। पीपावर्यस्य विचारः अस्ति यत् पूजा तु अलख-निरंजनस्य-अविनाशिनाः परम-तत्वस्य भवेत् यः समस्त मानवतायाः परमं कारणमस्ति। अतः संसार-सारः केवलमात्रं ईश्वरस्य उपासना अस्ति। अन्ध-धार्मिकतां प्रति तस्य समर्थनं नासीत्, खण्डनं स्पष्टम्। स्वस्य वाचः माध्यमेन तेन स्पष्टभाषणं कृतम् यत् ''यदि कलियुगे सन्तः न भवन्ति तर्हि लोकस्य मिथ्या धारणाः सतश्च कलियुगस्य अन्धविश्वासो धर्मस्य मौलिकीं मान्यतां सत्यभक्तिं च रसातले प्रापयति।''

**जै कलि नाम कबीर न होते।**
**तौ लोग बेद अरु कलिजुग मिलि करि।**
**भगति रसातलि देते।।**
**भगति प्रताप राखिए कामनि।**
**निज जन आप पढाया।।**
**नाम कबिरा साँच प्रकास्या।**
**तहां पीपै कछु पाया।।**

**3. सद्गुरोः महत्ता**

राजर्षिः पीपा न केवलं समाजस्य कृते दिशानिर्देशान् दतवान् अपितु भक्ति-साधनायाः कृते सद्गुरोः महत्ताम् अनिवार्यतां च अत्यावश्यकरूपेण प्रतिपादितवान्। सः मन्यतेस्म यत् सद्गुरुः स एव अस्ति यः समाजे धर्मे च समन्वयभावं प्रकटयति।

**''सतगुरू सांचा जौहरी, परसे ज्ञान कसौट।**
**पीपा सुघोई करे, दे अण भेरी चोट।।**
**लोह पलट कंचन करियो सतगुरू रामानन्द।**
**पीपा पद रज है सदा मिट्यों जगत का फन्द।।**
**सुआरथ के सब मितरे, पग-पग विपद बढ़ाय।**
**पीपा गुयु उपदेस बिनु, सांच न जाण्यो जाय।।''**

**4. श्रमसाधनायाः कर्मणः च महत्त्वम्**

स्वस्य सुदृढ-सामाजिक-चेतना-शक्ति-द्वारा

''पीपा'' वर्येण वर्गभेदस्य चातुर्वर्ण्यस्य च प्रतिरोध-स्वरूपे एको नूतनः पञ्चमः वर्णः रचितः। अस्मिन् श्रमस्य प्रधानता कर्मणः महत्वम् हिंसायाः युद्धस्य च त्यागः अन्तर्भूत आसीत्। तेन नूतनो यः पञ्चमवर्णः 'श्रमिकवर्ण' नाम्ना निर्दिष्टः।

एषः श्रमिकवर्णः ब्राह्मणक्षत्रियवैश्यशूद्रेषु मध्यमः आसीत्। एष एतादृशो नूतनः सामाजिकवर्णः आसीत् यस्मिन् उच्चनिम्न-भावाः जातिबन्धनानि च पूर्णरूपेण मुक्तानि आसन्। एषः वर्णः प्रतिक्षणं श्रमकर्म कुर्वन् मुखेन परमतत्त्वस्य रामस्य नाम्न उच्चारणं करोतिस्म। सः समाजे सौहार्द-भावेन अवसत्। पीपावर्यस्य एतत् मौलिकं सामाजिकं कार्यम् तस्मिन् युगे वस्तुतः चतुर्वर्ण-परम्परायाः विरोधे एकं प्रतिरोधात्मकं आन्दोलनम् आसीत्। येन वर्णव्यवस्थायां सुधारात्मकं परिवर्तनं च कृतम्। तस्य वाचि एषः भावः अस्ति यत्-

**''हाथां से उद्यम करे मुख सौ उचरै राम।**
**पीपा साधाँ रो धरम, रोम रमारै राम।।''**

सः सामाजिक-चेतनायां समन्वयस्य महान् आख्याता अस्ति। तेन ब्रह्मसाक्षात्कारः कृतः यस्य अन्वेषणं कुर्वन् मानवः आजीवनं परिभ्रमति। पीपा समाजे ब्रह्मणस्वरूपस्य परिचयं दत्वा वदतिस्म यत् तस्य ब्रह्मणः परिचयं तु स्वस्य मनसि आगतेन अनुभवेन भवति।

**''उण उजियारा दीप की सब जब फैली ज्योत।**
**पीपा अन्तर नैण सो, मन उजियारा होत।।''**

**5. रूढीनां दृढविरोधः**

महात्मनः पीपावर्यस्य सामाजिकचेतनायां रूढिसमाप्तेः कार्यम् अतिमहत्वपूर्णमस्ति। तस्मिन् युगे एषापि आश्चर्यजनकघटना आसीत् यत् पीपानन्देन सह तस्य जीवनसंगिनी अपि संन्यासं स्वीकृत्य साध्वी अभवत्। एतावत् एव न अपितु राज्ञी सीता सौलंकी स्वस्य पतेः सहयोगं कृत्वा समाजस्य पातिव्रतधर्मस्य सम्यक्रूपेण निर्वहनं कृतवती। एतत् तद् युगमासीत् यदा मुगलाः महिलानां उपरि अत्याचारं व्यभिचारं च कुर्वन्ति स्म। क्षत्रियजातिषु सर्वाधिका पर्दाप्रथा आसीत्। तस्मिन् काले पीपाजी स्वस्य पत्न्याः सीतायाः पर्दाप्रथां सर्वप्रथमं त्रोटयित्वा समाजे एतत् प्रमाणितं कृतवान् यत् यस्यां आत्मबलस्य समाज-सेवायाः ईश्वर-भक्तेः च सद्भावाः सन्ति तस्याः नार्याः कृते पर्दाप्रथायाः आवश्यकता नास्ति। वस्तुतः शतवर्षपूर्वं एष एकोऽद्वितीयः समाजसुधारः येन स्त्रीसमाजे जागृतेः इच्छाशक्तेश्च भावाः उत्पन्नाः जाताः। सः पीपावर्यः युद्धं संघर्षं च कृत्वा न केवलं स्वरक्षां कृतवान् अपितु अनेकेषां राज्यानां शासनं संचालितं कृतवान्। अस्मिन् सन्दर्भे पीपाजी स्वस्य वाचा प्रकटितवान्।

**जहां पडदो तहां पाप पडदो बिना पावे नाही।**
**जहां हरी हाजर आप, पीपा तिहो परदो किसौ।**

समाजे रूढ़िविषये पीपावर्यस्य अस्य कार्यस्य महत्तायाः प्रशसायां प्रसिद्धः सामाजिकविचारकः मैक्स आर्थर मैकालिफः सुन्दरं लिखति यत्-

"Probably the first effort in the modern time in India to abolish the tyranny of the Parda by Pipa was this."

अनन्तरमाजीवनं सीतासहचरी पर्दाप्रथां विना एव समाजे सार्वजनिकरूपेण पीपानन्देन सह जीवनं निरवहन्। तस्मित् समये क्षत्रियेषु पर्दाप्रथायाः अत्यधिकं प्रचलनम् आसीत्।

**6. समाज चेतना**

पीपावर्यस्य जीवनस्य महती सामाजिकी विशेषता एषा अस्ति यत् सः समाजसुधारस्य सद्भक्तिसाधनायाः च आख्यानाय राजा सन्नपि सर्वस्वं वैभवं त्यक्त्वा साधुः अभवत्। भारतीये मध्ययुगीने इतिहासे एतादृशं प्रथमं दुर्लभमुदाहरणं कुत्रापि न दृश्यते। पीपा खींची चौहान क्षत्रिय वंशे जन्म प्राप्तवान् आसीत्। अस्मिन् वंशे युद्धस्य प्रधानता आसीत्। तस्य गुरोः स्वामिरामानन्दस्य चिन्तनमासीत् यत् तस्य वैष्णवान्दोलने तस्य समयस्य पीडित शोषितवर्गस्य, अन्त्यजानां च कल्याणस्य कृते राजपूतानां कल्याणस्य च कृते कस्यचन वीरादर्शशिष्य-स्य आवश्यकता आसीत् यतोहि विशेषरूपेण क्षत्रियजनाः शासनकरणे हनने च अग्रेसरा आसन्। मध्ययुगे शासनं हस्तगतं स्यात्तर्हि ते कलहं कुर्वन्तिस्म। एषा समस्या

उत्तरभारते आसीत्। अत: एतस्या: समस्याया निराकरणं कथं भवेत् एषा विडम्बना असीत्।

अस्मिन् समये एतस्या: समस्याया: समाधानाय रामानन्दवर्यस्य सविधे योग्य: शिष्य: पीपानन्द: अमिलत्। स: गुरुनिर्देशानुसारं तस्य क्षेत्रस्य अनेकान् क्षत्रियान् राज्ञ: सरदारान् च भक्तिमार्गे दीक्षयित्वा समाज-सुधारस्य समन्वयस्य च कार्यं प्रति प्रेरितवान् येन समाजे शांति: सहभागिता च स्थापिताऽभूत्, नवीन-सामाजिक-चेतानाया: च प्रादुर्भावोऽभवत्। स्वयं पीपावर्यो जीर्ण-शीर्णवस्त्राणि सम्यक् कृत्वा समाजे स्वावलम्बनस्य भावनाया: विकासं कृतवान्।

**7. दुर्व्यसनस्य भर्त्सना**

पीपा समाजे जनानाम् आचरणस्य जीवनमूल्यस्य च विघटनं प्रति जागरूक आसीत्। तस्य दृष्टौ मादकवस्तूनां सेवनं मांसाऽऽहारस्य च सेवनं वर्जितं कर्म आसीत्। तेन उक्तम् -

**''जीव मार जीमण करै, खाता करै बखाण।**
**पीपा परतख देख ले, थाली माँहि मसाण।।**
**पीपा पाप न कीजिये, अगलौ रहिये आप।**
**करणी जासी आपणी, कुण बेटो कुण बाप।।''**

तेन दृढ़तापूर्वकं समाजस्य साधूनाम् अपि तीव्रा भर्त्सना कृता। ये सन्त: मठाधीशा: भूत्वा वैभवपूर्ण-वस्त्राणि धारयित्वा मनसि कपटं रक्षन्ति। तेन कबीरस्येव तेषां सतां मुखे कालिका-पोतनस्य विचाराणां समर्थनं कृतम्।

**पीपा जिनके मन कपट, तन पर उजरौ भैस।**
**तिन को मुख कालो करौ, संत जनां का लेख।।**

तेन सामाजिक-समन्वयस्य प्रेरणा हरित-पुष्पघनी-द्वारा दत्ता। पीपानन्दस्य स्वेन भारतदेशेन सह अथाह: स्नेह: आसीत्। अस्य देशस्य मृत्तिकाया: स्वस्य नेत्रयो: अञ्जनं कृत्वा भारतस्य रम्यां सुन्दरतां दृष्ट्वा तेन सेयं भावाभिव्यक्ति: प्रकटिता।

**फूल बगीचा में घणा, सबरो सुन्दर रूप।**
**पीपा जद मिल सब छबै, भासे रूप अनूप।।**

**8. यत्पिण्डे तत् ब्रह्माण्डे ''इत्यस्य सूत्रम्''**

सन्त: पीपावर्य: समाजे व्याप्तानां बाह्याडम्बराणां, कर्मकाण्डानां, रूढीनां च प्रबलो विरोधी आसीत्। स मन्यते स्म यत् ईश्वर: निराकार: निर्गुण: अस्ति। सर्वमिदम् ईशावास्यम्। स: ईश्वर: अक्षत: अस्ति। स: जीवात्मन: रूपे प्रत्येकस्मिन् जीवे व्याप्त: भवति। पीपानन्दानुसारं मानवशरीरे एव सर्वा: सिद्धय: व्याप्ता: सन्ति। तस्य एतत् विराट् चिन्तनं बभूव यत्पिण्डे तत् ब्रह्माण्डे, पिण्डमेव ब्रह्माण्डस्य सूत्रं मूर्तयति। यदा स: स्वस्य शरीरे सर्वान् निधीन् प्राप्नोति तदा बाह्यमन्दिरस्य तीर्थस्य वा पूजाया: काऽपि आवश्यकता न भवति। पवित्र गुरुग्रन्थसाहिब ग्रन्थे गागरोनस्य विभूते: पीपानन्दस्य वर्णनमस्ति। तस्य एतत् पद्यं भारतीय भक्ति साहित्यस्य कण्ठहारं मन्यन्ते सुधिय: -

**''अनत न जाऊ राजा राम की दुहाई।**
**काया गढ़ खोजता मैं नौ निधि पाई।।**
**काया देवल काया देव, काया पूजा पांति।**
**काया धूप दीप नश्बेद, काया तीरथ जाती।।**
**काया माहै कंवलापति बैकुण्ठवासी।**
**जै ब्रह्माण्डे सोई प्यंडे जै खोजे सो पाई।**
**पीपा प्रण वै परमोत तरै, सदगुरू मिलै लेखावै।।''**

पीपावर्य: समाजस्य लोकव्यापिने समन्वययाय अनेकेषु पद्येषु विचारेषु च अनुपमाम् अभिव्यक्तिं दत्तवान्। एषा अद्यापि प्रचलिता। अत: महात्मन: पीपानन्दस्य रचना संसारे लोक-मंगलस्य, सामाजिक-चेतनाया: भक्तिसाधनाया: च पावनेषु भावेषु आधारिता अस्ति। अद्य धर्मेषु नस्लेषु जातिषु क्षेत्रेषु च सर्वत्र मानवताविरोधिन्य: शक्तय: सक्रिया: सन्ति। एतादृशे समये सन्तपीपावर्यस्य विचारधारा वाक् च अस्मान् समन्वयाय, अखण्ड-मानवता सिद्धान्ताय च प्रेरयति।

**-संस्कृत अनुवादक: श्री पवन पाटीदार।**
**'अनहद', जैकी स्टूडियो, 15 मंगलपुरा,**
**झालावाड़-326001 (राजस्थान)**

# शास्त्रनिर्णीतनिपातविधानम्

❑ योगेश्वरस्वामी

'निपात:' इति नि-उपसर्गपूर्वकात् 'पत्लृ गतौ' भौवादिकधातो: घञि प्रत्यये कृते निष्पद्यते।

यद्वा यास्काचार्येण अस्य स्वरूपनिर्धारणमनेन प्रकारेण कृतमस्ति- "**उच्चावचेष्वर्थेषु निपतन्ति इति निपाता:।**" अनेकप्रकारेष्वर्थेषु प्रातिपदिकत्वेन निपतति इति निपात: इत्यस्मिन् विग्रहे न्युपसर्गपूर्वकात् 'पत्लृ गतौ' भौवादिकधातो: "ज्वलितिकसन्तेभ्यो ण:" इति सूत्रेण कर्तरि णप्रत्यय:[1]।

केचिद् विद्वांसो ब्रुवते यद् ये शब्दा: भाषायामज्ञात-रूपेण पतिता: (आगता:) येषाञ्च प्रकृतिप्रत्ययानां विषये स्पष्टरूपेण ज्ञातता नास्ति त एव निपाता: कथ्यन्ते।

महर्षिपाणिनिना निपातसञ्ज्ञा "प्राग्रीश्वरान्निपाता:" इति अधिकारसूत्रादारभ्य "अधिरीश्वरे" इति सूत्रपर्यन्तं निर्दिष्टा। तत्र मुख्यत्वेन "चादयोऽसत्वे" "प्रादय:" चेति द्वयो: सूत्रयो: चादिप्रादिगणान्तर्गतपठितानां शब्दानां निपातसञ्ज्ञा भवति। द्वाविंशति निपाता: प्रादिगणान्तर्गत-पठिता: सन्ति। सप्तत्यधिकद्विशतं निपाता: चादिगणा-न्तर्गतपठिता भवन्ति। निपातसञ्ज्ञकपदानि चादिगणे परिगणितानीति तान्येतान्येव सन्तीति निश्चित्य न शक्यते वक्तुम्। तत्त्वरूपनिर्धारणे च 'उच्चावचेष्वर्थेषु निपतन्तीति' नैरुक्तिकी व्युत्पत्ति: प्रसिद्धा।

तथा चोक्तमेतद् ऋक्प्रातिशाख्ये -

**निपातानामर्थवशान्निपातनादनर्थकानामितरे च सार्थका:।**
**नेयन्त इत्यस्ति सङ्ख्येह वाङ्मये मिताक्षये चाप्यमिताक्षरे च ये।।**

अनेनोद्धरणेन इदमवधार्यते यद् निपातानां सङ्ख्यानं कर्तुं न कोऽपि समर्थ:। निपातानां पातो सामूहिको भवति।

शौनकाचार्येणापि प्रोक्तं यद् निपातानामियन्त इति संख्यानं न विद्यते। अर्थात् प्रयोजनवशादेते पदे पदे निपात्यन्ते।

**इयन्त इति संख्यानं निपातानां न विद्यते।**
**प्रयोजनवशा ह्येते निपात्यन्ते पदे पदे।।**

निरुक्ते द्वितीयपादारम्भे- 'अथ निपाता:'। 'उच्चावचेष्वर्थेषु निपतन्ति' इति लक्षणेन निपातानां वाचकत्वमुक्तम्। परन्तु केचन 'कमीमिदित्यादिनिपाता: पादपूरणा' इति च तत्रैवोक्तम्। तस्मात् केचन निपाता: अर्थवन्त:, केचन अनर्थका: इति ज्ञायते। "चादयोऽसत्त्वे" इत्यादिसूत्राण्यपि निपातानामनर्थवत्त्वे प्रमाणानि।

वार्तिककारेणोक्तम्- 'निपातस्यानर्थकस्य प्रातिपदिकत्वम्'[2] इति।

ऋक्प्रातिशाख्येऽपि प्रोक्तम्- 'केचन निपाता: सार्थका: केचन निरर्थका: केचन पादपूरका भवन्ति।'

उवटाचार्येण स्वकीये भाष्ये कथितं यत्- 'केचन निपाता: सार्थका: केचन निरर्थका:।' तथा चोक्तं हरिणा-

**निपाता द्योतका: केचित् पृथगर्थाभिधायिन:।**
**आगमा इव केऽपि स्यु:सम्भूयार्थस्य वाचका:।।**

तत्र केषाञ्चिन्निपातानां द्योतकत्वं येषां पदान्तरसम-भिव्याहारं विना प्रयोगो न भवति। यथा चादीनाम्। केषाञ्चिद् वाचकत्वं येषां पदान्तरसमभिव्याहारापेक्षा न नियता। यथा 'शाश्वत्, युगपत्' इत्यादि। अत एव कोशेष्वपि केषाञ्चिन्निपातानामर्थनिर्णय: क्रियते। केषाञ्चिद् वाचकत्वम्, केषाञ्चिदनर्थकत्वमिति स्वीकारादेव 'निपातस्य चानर्थकस्य' इति सकर्मकत्वा-नापत्या साक्षादित्यादीनां द्योतकत्वम्। अन्येषां वाचकत्वम्।

प्राचीना: मीमांसकास्तु निपातानामपि उपसर्गाणा-मिव द्योतकत्वमेव मन्यन्ते। उक्तं च आकृत्यधिकरणे भट्टपादै: -

1 निरूक्तम्- (1-2) दुर्गाचार्यकृत-ऋज्वार्थाख्यव्याख्या

2 अष्टाध्यायी- (1-2-45) इति सूत्रवार्तिकम्

**चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।**
**क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः।।**
**तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।**
**यदर्थद्योतकौ तौ तु वाचकः स विचार्यते।।**

तेषामयमाशयः - निपाता अपि द्योतका एव। तथा हि 'प्लक्षन्यग्रोधयोः समुच्चयः' इति वाक्यप्रयोगे षष्ठी निर्दिश्यते। नैवं समुच्चयार्थकचशब्दप्रयोगे प्लक्षन्यग्रोधयोश्चेति। यथा च 'व्रीहियवयोः विकल्पः प्रवर्तताम्' इति वाचकशब्दप्रयोगे सत्त्वभूतः विकल्पशब्दार्थः क्रियया सम्बद्ध्यते, नैव व्रीहियवयोर्वा प्रवर्तताम् इति। किं च वृक्ष इति वाचकशब्दप्रयोगे यथा शाखादिमानर्थः प्रतीयते, न तथा च इत्युक्ते समुच्चयः प्रतीयते। किञ्च यथा 'भिक्षां देहि, देहि भिक्षाम्' इति वाचकशब्दानां पौर्वापर्यप्रयोगे कामचारः, न तथा वृक्षश्च, च वृक्ष इति। अपि च यथा वाचकस्य वृक्षः शोभनः इति विशेषणान्वयः दृश्यते, न तथा च शोभनः इति निपातस्य। निरुक्तस्यापि द्योतकत्वपक्षे एव तात्पर्यम्। तथा चोक्तम् -

'स चैषामुच्चावचोनेकप्रकारोऽर्थः सर्वतोऽनवगम्यमानात्मा पदान्तरसम्बन्धोपहितप्रकरणाद्यनुविधानेन अवसीयते' इति।

नैयायिकादयः निपातानां वचाकत्वमेव समर्थयन्तीत्थम्-

**तेषामुच्चावचार्थत्वात् सर्वसम्बन्धदर्शनात्।**
**अन्यतन्त्रतयोद्भूते असत्त्वार्थत्वमुच्यते।।**
**तत्प्रयोगावसेयत्वात् वाच्यस्तेषां स गम्यते।**
**समुच्चयादिरर्थात्मा यथान्येषां गवादिकः।।**

उपसर्गाणां निपातानां च वाच्योऽर्थोऽस्ति न वेति विप्रतिपत्तिः। तत्र 'न निर्बद्धा उपसर्गा अर्थान्निराहुः इति शाकटायनः। नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति। उच्चावचाः पदार्थाः भवन्तीति गार्ग्यः' इति निरुक्तेन उपसर्गविषये द्योतकत्वं वाचकत्वमिति पक्षद्वयमपि प्राचीनमिति ज्ञायते। तथा चोक्त हरिणा वाक्यपदीये-

**स वाचको विशेषाणां सम्भवात् द्योतकोऽपि वा।।** इति।

उपसर्गाणां द्योतकत्वं शाकटायन-यास्क-पाणिनि-पतञ्जलि-गौतम-जैमिन्यादिसम्मतम्। निपातेषु ये अनर्थकाः पादपूरणाः तान्विहाय अन्येषां वाचकत्वमेवेति नैयायिकादयः। सर्वेषां निपातानां द्योतकत्वमेवेति प्राचीनमीमांसकाः। उपसर्गाणां निपातानां च वाचकत्वमेवेति नव्याः।

**वाक्यपदीयकारभर्तृहरिः**

वाक्यपदीयकृता भर्तृहरिणा पदकाण्डे-

**चादयो न प्रयुजन्ते पदत्वे सति केवलाः।**
**प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते।।**

इति कारिकया चादयो वाचकाः न भवन्ति। पदत्वे सति केवलानामप्रयुज्यमानत्वात् व्यतिरेके गवादिपदवत् इत्यनुमानाद् निपातानां द्योतकत्वं निष्कृष्यते।

**प्रदीपकारकैयटः**

कैयटस्यापि अत्र द्योतकत्वपक्ष एवाभिमतः। 'अथ शब्दानुशासनम्' इति प्रदीपव्याख्यावसरे अधिकारः प्रस्तावः द्योत्यत्वेनास्य प्रयोजनमित्यर्थः। निपातानाञ्च द्योतकत्वं वाक्यपदीये निर्णीतम् इति उक्तत्वात्।

**भट्टोजिदीक्षितकौण्डभट्टौ**

भट्टोजिदीक्षिताः कौण्डभट्टाश्च

**निपातानां वाचकत्वमन्वयव्यतिरेकयोः।**
**युक्तं वा न तु तद्युक्तं परेषां मतमेव नः।।**

इति कारिकया सर्वेषां निपातानां द्योतकत्वं वाचकत्वं चेत्येव निष्कर्षरूपेण स्वीकुर्वन्ति, न तु द्योतकत्वमेव अथवा वाचकत्वमेव।

**उद्द्योतकारनागेशभट्टः**

नागेशभट्टास्तु लघुमञ्जूषादौ लक्ष्यानुरोधात् निपातानां द्योतकत्वं वाचकत्वञ्च निष्कर्षन्ति। अर्थात् प्रयोगदृष्ट्या केषाञ्चिद् द्योतकत्वं केषाञ्चिद् वाचकत्वञ्च। यथा अनुभूयते सुखम् इत्यादौ साक्षात्क्रियते घटः इत्यादौ तु द्योतकत्वम्, अहंयुः इत्यादौ च अस्मदाद्यर्थवाचकत्वम्, वाचकत्वमन्तरेण कर्मलकारयुस्प्रत्ययादीनामसम्भवात्।

**भाष्यकारः**

भाष्यकृतां पतञ्जलीनामपि 'शब्दानुशासनं नाम शास्त्रमधिकृते वेदितव्यम्' इत्यादि पस्पशायाम्, ''अव्ययं विभक्ति...'' इति सूत्रे, ''अधिपरी अनर्थकौ'' इत्यत्र, ''नञ्'' इति सूत्रादिस्थले द्योतकत्वं वाचकत्वञ्चेत्येव स्वरसः इति। तेषां वाचकत्वादेव 'निर्मक्षिकम्' इत्यादौ पूर्वपदार्थप्राधान्यं भाष्योक्तं सङ्गच्छते। अत एव च 'सङ्कटे सङ्गतम्' इत्यर्थे ''सम्प्रोदश्च कटच्'' इति कटच्प्रत्ययः, 'उद्गत' इत्यत्र 'उद्गतानि' इत्यर्थे ''उपसर्गाच्छन्दसि धात्वर्थे'' इति वतिः, तदेवं 'संकटम्', 'उद्गत' इत्यादौ समादेः उद्गत-सङ्गतरूपक्रियाविशिष्टसाधनवाचकतोक्ता भाष्ये।

निपातस्य किं लक्षणम् इत्याकाङ्क्षायां पाणिनिना कृतमाभिधानिकं निर्वचनं ध्यातव्यं द्रष्टव्यञ्चेति। ''चादयोऽसत्त्वे'' इति सूत्रेण प्रतीयते यत् सत्त्वाभिन्नाः शब्दा निपातसञ्ज्ञा भवन्ति। सत्त्वशब्दः द्रव्यपदार्थको भवति। सत्त्वशब्दस्यापरपर्यायः द्रव्यम्। द्रव्याश्रय-ग्रहणशीलः शब्दः सत्त्ववान् भवति। महामुनिपाणि-निमतानुसारं निपाताश्चतुर्विधाः सन्ति। तद्यथा-

**1. विशुद्धनिपातः**[3] - च, एव, ह, उ, ए इत्यादयः।

**2. गत्युपसर्गसञ्ज्ञाविशिष्टनिपातः**[4] - 'सुप्रणयति' इत्यत्र उपसर्गत्वात् ''उपसर्गादसमासेपि णोपदेशस्य'' इति सूत्रेण णत्वम्, ''गतिर्गतौ'' इति सूत्रेण 'प्र' इतिगतिसञ्ज्ञके परे 'सु' इति गतिसञ्ज्ञकस्य उकारानुदात्तः स्यात्।

**3. गतिसञ्ज्ञामिश्रितनिपातः**[5] - 'ऊरीकृत्य' इत्यत्र गतिसञ्ज्ञत्वात् ''कुगतिप्रादयः'' इति सूत्रेण समासः। 'शुक्लीकृत्य' इत्यत्र गतिसञ्ज्ञत्वात् ''ते प्राग्धातोः'' इति सूत्रेण पूर्वप्रयोगः एवं ''कुगतिप्रादयः'' इति सूत्रेण समासः।

**4. कर्मप्रवचनीयसञ्ज्ञासंवलितनिपातः**[6] - 'पर्जन्यो जपमनु प्रावर्षत्', 'वृक्षं प्रति परि वा विद्योतते विद्युत्।'

**इतोऽपि किञ्चित् सूक्ष्मदृशा परिशीलने निपाता अष्टविधाः -**

**1. आख्यातमूलकनिपाताः** - नास्ति, अस्ति, अस्तु, आह इत्यादयः।

**2. नामधातुमूलकनिपाताः** - सनायते, स्वधयति इत्यादयः।

**3. सर्वनाममूलकनिपाताः** - तत्, यत्, ते, मे इत्यादायः।

**4. धातूपसर्गोपश्लेषनिपाताः** - 'नि+अञ्च=न्यक्', 'प्र+अय्= प्रायः', 'सु+अस्+तिप्=स्वस्ति', 'सु+आह = स्वाहा' इत्यादयः।

**5. नाममूलकनिपाताः** - उमा, दोषा, सनकः, सनन्दनः, सनत्कुमारः इत्यादयः।

**6. स्वरप्रतिरूपकनिपाताः**[7] - अ, आ, इ, ई, उ, ऊ, ए, ओ, औ इत्यादयः।

**7. उपसर्गप्रतिरूपकनिपाताः** - अवदत्तम्, विदत्तम् इत्यादयः।

**8. विभक्तिप्रतिरूपकनिपाताः पञ्चविधाः -**

**1. तृतीयाविभक्तिसंवलितनिपाताः**- अन्तरेण, अन्तरैः, अधुना इत्यादयः।

**2. चतुर्थीविभक्तिसंवलितनिपाताः** - अह्नाय, चिराय इत्यादयः।

**3. पञ्चमीविभक्तिसंवलितनिपाताः** - बलात्, पश्चात्, पश्चातात् इत्यादयः।

**4. षष्ठीविभक्तिसंवलितनिपाताः** - चिरस्य, नानानाम् इत्यादयः।

---

3 चादयोऽसत्त्वे- (1-4-57) प्रादय- (1-4-58) इति द्वाभ्यां सूत्राभ्यां पाणिनिना निर्दिष्टा।

4 उपसर्गाः क्रियायोगे-(1-4-59) गतिश्च- (1-4-60) इति द्वाभ्यां सूत्राभ्यां पाणिनिना निर्दिष्टः।

5 ऊर्यादिच्विडाचश्च-(1-4-61) इति सूत्रेण पाणिनिना निर्दिष्टः।

6 कर्मप्रवचनीयाः - (1-4-83) इत्यधिकारस्थैः सूत्रैः पाणिनिना निर्दिष्टः।

7 उपसर्गविभक्तिस्वरप्रतिरूपकाश्च निपाता भवन्ति। - महाभाष्यम्- (2-2-24)

**5. सप्तमीविभक्तिसंवलितनिपाताः** – परे, पारे, रात्रौ इत्यादयः।

**यास्काचार्यमते[8] निपाताः त्रिविधाः –**

**1. उपामार्थकनिपाताः** – इव, न चित्, नु इत्यादयः।

**2. कर्मोपसंग्राहर्थकनिपाताः** (समुच्चयार्थकाः) – च, आ, वा, अह, ह, उ इत्यादयः चतुर्दश निपाताः।

**3. पादपूरकनिपाताः** – उ, खलु इत्यादयः।

भोजदेवाचार्यमते निपाताः षड्विधाः–

1. विध्यर्थकनिपातः 2. अर्थवादार्थकनिपातः 3. अनुवादार्थकनिपातः 4. निषेधार्थकनिपातः 5. विधिनिषेधार्थकनिपातः 6. अविधिनिषेधार्थकनिपातः।

निपातानामनन्तानां प्रतिपादनं पाश्चात्याः पञ्चसु विभागेषु कुर्वन्ति। ते च विभागाः –

**1. पूर्वविभक्तिरूपाः** – प्ररेत्याद्युपसर्गाः, अच्छ, अन्वाजे, ऊरी, ऊररी, खात्, सत्, असत्, प्राध्वम्, नमस्, प्रादुस्, मिथ्या, वशे, साक्षात्, अन्तर्, अस्तम्, आविस्, तिरस्, पुरस् इत्येतान् रक्षन्ति।

**2. क्रियाविशेषणरूपाः** – सत्यम्, मृदु, सुखम्, लघु, निर्भरम्, अवश्यम्, अत्यन्तम्, बलवत्, भूयस्, दुःखेन, सुखेन, धर्मेण, दक्षिणेन, उत्तरेण, अशेषेण, चिरेण, क्षणेन, चिराय, चिररात्राय, अर्थाय, बलात्, हर्षात्, शोकात्, दूरात्, तस्मात्, कस्मात्, चिरात्, दूरात्, उत्तरात्, स्थाने, दूरे, प्रभाते, प्राह्णे, अग्रे, एकपदे, सपदि, ऋते, समीपे, अभ्यासे इत्यादिशब्दान् पठन्ति।

**3. शब्दांशरूपाः** – अद्, का, कु, चन, चित्, न, स्म, स्वित्, स्वकी इत्यादीन् शब्दान् संगृह्णन्ति।

**4. संयोजनरूपाः** – अथ, अथो, उत, च किञ्च, वा, अथवा, तु, किन्तु, किंवा, चेत्, यदि, यदापि, नेत्, नोचेत्, हि, तत् तेन, आहो, आहोस्वित्, उताहो, किम्, किन्नु, किमुत, किंस्वित्, ननु, नवा, नु, आम्, अद्धा, यावत्, तावत्, यदा, तदा अति इत्यादयः शब्दाः सगणयन्ति।

**5. विस्मयादिबोधकाः** – तु, आ, इ, उ, ए, ऐ, ओ, अह, अहह, अहो, वत, ह, हा, हाहा, किम्, धिक्, हन्त, हम्, हुम्, अङ्ग, अये, प्याट्, भोस्, हे, है, हो, अरे, रे, रेरे, अरेरे, श्रौषट्, वौषट्, वषट्, स्वाहा, स्वधा इत्यादिशब्दान् संपठन्ति[9]।

शृंङ्गारप्रकाशे भोजदेवेन उपसर्गाः षड्धा व्याख्याताः। तद्यथा–

**1. वाचकाः**– समासस्थले प्रतिभान्ति यथा– प्रगता ऋषभाः अस्माद् वानाद् इति प्रर्षभं वनम् इत्यत्र प्रशब्दस्य वाचकत्वमवगम्यते। एवं मक्षिकाणामभावो निर्मक्षिकम्, अवगतो मन्युरस्य इति अपमन्युः इत्यादिषु वाचकत्वस्य प्रतीतिर्भवति।

**2. द्योतकाः** – प्रतिष्ठते, अपकरोति, निर्विवेश इत्यादौ।

**3. सहाभिधायकाः** – प्रस्तुते, अनुरुध्यते, अधीते, अभिवादयते। एते धातवः उपसर्गेण सह सहाभिधायकाः भवन्ति।

**4. कार्यार्थाः** – विजयते, उपस्कुरुते, प्रणश्यतीत्यादयः।

**5. निरर्थकाः** – प्रारभते, अपहरति, विगाहते, निमज्जतीत्यादौ।

**6. विशेषकाः–विशेषकेषु उपसर्गेषु द्विधा क्रमः।**

**1. प्रकृत्यर्थविशेषकाः** – प्रवर्धते, प्लायते, संसरति, अनुमन्यते इत्यादयः।

**2. प्रत्ययार्थविशेषकाः**– मनस्वी सुभवति, सुमनायते, दुर्भवति, अपहस्तयति इत्यादिषु प्रत्ययार्थस्यै–वोपसर्गाः विशेषका भवन्ति।

**(नव्यव्याकरणाचार्यः, वेदांताचार्यः, नव्यन्याचार्यः, पीएच.डी.) स्वामिनारायणसंस्कृतविद्याप्रतिष्ठानम्**

**सरधारः– गुजरातम्**

8 उच्चावचेषु चार्थेषु निपाताः समुदाहृताः।
कर्मोपसङ्ग्रहार्थे च क्वचिच्चौपम्यकारणात्।।
ऊनानां पूरणार्थं वा पदानामपरे क्वचित्।
मिताक्षेरषु ग्रन्थेषु पूरणार्थस्त्वनर्थकाः।।

9 उपसर्गनिपातमीमांसा – डॉ. गेयकुमारझा – पृ. 167

# शारदातनयस्तदीयं भावप्रकाशनञ्च

❑ दिव्या शर्मा

**जीवन परिचयः** – नाट्यशास्त्रीयविद्वत्सु शारदातनयस्य महत् स्थानं वर्तते। भावप्रकाशनमित्याख्यो नाट्यशास्त्रविषयकोऽस्य प्रसिद्धो ग्रन्थो वर्तते। अद्यावधि शारदातनयस्य जीवनवृत्तान्तस्य जन्मकालस्य च विशेषः परिचयो न मिलति। स्वग्रन्थे अयं स्वस्य कृते शारदायाः (सरस्वत्याः) तनयः (पुत्रः) 'शारदातनय' इत्यभिधानमुद्घोषितवान्। भाषावैज्ञानिकदृष्ट्या आर्यावर्तदेशे 'मेरूत्तरं' जनपदमाधुनिकं मेरठनामधेयं नगरमवगम्यते। भावप्रकाशनस्य सर्वाः पाण्डुलिपयः दक्षिणभारत एव उपलब्धा अभवन्। तस्माच्छारदातनयः मेरूत्तरस्य दक्षिणे भागे स्थितस्य यस्य 'माठरपूज्य' इत्याख्यस्य ग्रामस्योल्लेखमकरोत्। असौ दक्षिणप्रदेशस्य मापूशिनामधेयो ग्रामो भवेत् कदाचित्। दक्षिणभारते 'माटपूशि' इति गोत्रसूचकम् उपनाम केषाञ्चिद् ब्राह्मणानामभूत्। 'मेरूत्तरं' जनपदन्तु निस्सन्देहं वर्तमाने विपर्यासात् 'उत्तरमेरू' इत्याख्यो ग्रामो वर्तते। यश्च चेन्नईति महानगरस्य समीपवर्तिनि चेङ्गलपटमण्डले स्थितो वर्तते। अनेनानुमीयते यदस्य शारदातनयस्य जन्मस्थानं दक्षिणभारत एवासीत् कदाचित्।[2]

**लक्ष्मणः** – नामधेयोऽस्य प्रपितामह आसीत्। तस्य श्रीकृष्णाख्यः पुत्रः शारदातनयस्य पितामह अभूत्। ततस्तस्य श्रीकृष्णस्य शिवप्रसादात् सुलोचनः भट्टगोपालनामधेयः पुत्रोऽभवत्। भट्टगोपालोऽयं शारदादेवीमुपास्य गुणश्रेष्ठं पुत्ररत्नमवाप।[3]

**जन्मकालः** – भावप्रकाशनकारोऽयं शारदातनयः शृङ्गारप्रकाशकाव्यप्रकाशयोर्बहून्युद्धरणानि स्वीये भावप्रकाशने उद्धृतवान्। तस्मादयं भोजमम्मटयोरुत्तरवर्ती भवेत्। एकादशशताब्द्याः पूर्वार्द्धभागः भोजराजस्य तथा तदुत्तरार्द्धभागश्च मम्मटस्य कार्यकालः स्वीक्रियते।

भावप्रकाशने भोजेन सह कस्यचित् सोमेश्वरनामधेयस्य आचार्यस्य सन्दर्भो मिलति।[1] ऐतिहासिकदृष्ट्या साहित्यिकक्षेत्रे 1131 ईस्वीतः 1261 ईस्वीं यावच्चतुर्णां सोमेश्वराणां जीवनकालावधिः आसीत्। एषु यः सङ्गीतरत्नावल्या रचनाकारः स एव सङ्गीतरत्नाकरे उल्लिखितायाः सङ्गीतरत्नावल्याः प्रणेता सोमेश्वर आसीत् कदाचित्। यस्याश्च 1174 ई. तः 1177 ईस्वीं यावत् रचनाकालः निर्धारितो वर्तते। अनेन शारदातनयस्य जन्मकालः 1200 ईस्वीतः 1250 ईस्वीं यावदासीदिति अनुमीयते।

**व्यक्तित्वम्** – भावप्रकाशनस्य सिंहावलोकनेन शारदातनयस्य किमप्यपूर्वं प्रतिरूपं दृष्टिपथे सजीवं भवति। अयं पूर्वकालिकाः ग्राह्याः परम्पराः हृदयङ्गमं कृत्वाताः स्वीयैः मौलिकैः विचारैरनुप्राणितवान्। बाल्यकाल एवाऽयं सकलवेदवेदाङ्गानि अधीतवान्। कदाचित् शारदातनय चैत्रयात्रामहोत्सवे प्रेक्षकैः सह नृत्यशालायामुपविष्टां शारदादेवीं नत्वा तैः प्रेक्षकैश्चानुज्ञातस्तस्याः समीपे उपाविशत्। भावाभिनयविज्ञैस्तैर्नटैः परस्परं त्रिंशत्प्रकाराणि परस्परं भिन्नानि रूपकाणि प्रयुज्यमाना–न्यालोक्याऽसौ वरदां तां शारदां नाट्यवेदमयाचत।[2]

ततः परं देव्याः समादिष्टात् कश्चिन्नाट्यशालापतेः 'दिवाकर' इत्यस्मादिद्विजात् सदाशिव–शिव–नारद–भारतादीनां विभिन्नैः मतैः सह अखिलं नाट्यशास्त्र–

1. Journal of the Andhra Historical Research Society, Vol. II P. 132 1/6-8
2. भावप्रकाशने–गायकवाड़ ओरिण्टल सीरीज नं. 45 बडौदा भूमिकां 12 पृष्ठे
3. भावप्रकाशने – 1/6-8

1. 'उक्तास्ता वृत्तयः साङ्गा भोजसोमेश्वरादिभिः।' भावप्रकाशने–1/94
'इतः परं विशेषास्तु भोजसोमेश्वरादिभिः।' भावप्रकाशने–7/78
2. भावप्रकाशने – 1/8

मधीतवान् शारदातनयः। देव्याः सन्निधौ तानि नानाविधमतानि अधीत्य तेभ्यः सारं संगृह्य नाट्यविदां हितार्थं भावप्रकाशनमित्याख्यं नाट्यशास्त्रीयं प्रबन्धं व्यरचयत्। तदुक्तञ्च तेन-

**शारदातनयो देव्यास्तान्यधीत्य च सन्निधौ।**
**आदाय सारमेतेभ्यो हितार्थं नाट्यवेदिनाम्।।**
**भावप्रकाशनं नाम प्रबन्धमकरोत्तदा।1**

शारदातनयस्य तर्कबुद्धिः सृष्टेर्मूलतत्त्वमन्विष्यन्ती सांख्यदर्शनं यावद् गच्छति। तन्मतानुसारं नाट्यरसानामिदमास्वादनं मनोरञ्जनं वा तथैव वर्तते यथा जीवात्मा सांसारिकभोगैः मनो रञ्जयति। तद्विषये स्वतर्कान् प्रस्तुवन् प्रतयभिज्ञादर्शनस्य रागविद्याकलादीनां षट्त्रिंशत्तत्त्वानां व्याख्यां प्रास्तौत् शारदातनयः।[2] अतोऽत्रैनं प्रत्यभिज्ञादर्शनस्याऽनुयायीति वक्तुं शक्नुमः। अमुना रसभावादीनि नाट्यविषयकाणि तत्त्वानि दार्शनिक-पृष्ठभूमौ संस्थाप्य स्वकीयेन मौलिकचिन्तनेन परीक्षितानि। अनेनाऽस्य नाट्यविद्दार्शनिकव्यक्तित्वस्य दर्शनं सरलतया कर्तुं शक्नुमः।

**भावप्रकाशनस्य प्रतिपाद्यः विषयः -**

भावप्रकाशनमाकृत्या नाट्यशास्त्रमिव विशालमस्ति। सदाशिव-शिवगौरी-वासुकि-नारदागस्त्य-व्यास-भरतादीनां नाट्यविदां मतानां सारंसंगृह्य शारदातनयः भावप्रकाशनं व्यरचयत्। दशस्वधिकारेषु विभक्तेऽस्मिन् ग्रन्थे श्लोकबद्धशैल्याः प्रयोगो विहितः। तत्र प्रथमेऽस्मिन् आदौ मङ्गलाचरणमात्मपरिचयञ्च प्रदर्श्य सर्वप्रमुखं भावनामधेयं तत्त्वं निरूपितवान् तन्मतानुसारं रसादप्यधिकतरं महत्त्वं वर्तते भावानाम्। काव्यस्यात्मा रसोऽस्ति, भावस्तु रसस्यापि जीवनाधायकं तत्त्वमभूत्। साध्यभूतस्य रसस्य प्राप्त्यर्थं भावस्य साधनत्वेन अपेक्षा भवति। तदनुसारं भावस्य सत्तां विना रसाभिव्यक्तिर्भवितुं नार्हति। विभावानुभावव्यभिचारिभावानां साङ्गोपाङ्गं प्रतिपादनमत्र कृतमस्ति।

द्वितीयेऽधिकारे भावानां लक्षणं तन्निरुक्तिञ्च प्रादर्शयत्। भरतवासुकिनारदादीनां रसोत्पत्तिविषयकाणि मतानि प्रस्तुतवान्। ततस्ताण्डवलास्ययोर्विवेचनं कृतवान्। तृतीयेऽधिकारे रसस्वरूपम्, रसभेदाः, शृङ्गारादिरसानां विवेचनम्, रसानां देवताः गुणानां स्वरूपञ्चेति विषयाः वर्णिताः सन्ति। चतुर्थेऽधिकारे शृङ्गाररसभेदान् प्रदर्श्य नायकनायिकयोः स्वरूपं तद्भेदान् च प्रास्तौत् शारदातनयः। ततश्च अमात्यविट्दूतादिस्वरूपं वर्णितमस्ति।

पञ्चमेऽधिकारे प्रथमं स्त्रियाः यौवनकोपचेष्टादीनां वैशिकनायकस्य स्वरूप-प्रकृति-व्यवहारावस्थादीनाञ्च विस्तृतं विवेचनं वर्तते। ततो नायिकानां सत्त्वशीलानुसारं भेदाः लक्षणानि च विवेचिताः वर्तन्ते। तदनन्तरं सलक्षणमुपचारस्य भेदाः योषितां रागापराधचिह्नानि, विरक्तिहेतवः, दृष्टिविकाराः दृष्टिभेदाश्च प्रदर्शिताः। षष्ठेऽधिकारे रसानुभूतिप्रकाशः, शान्तरसस्य विशिष्टं विवेचनं, शब्दशक्तयः शब्दार्थसम्बन्धश्चैते वर्णिताः सन्ति।

सप्तमेऽधिकारे गान-वादन-नृत्य-नाद-वर्ण-स्थान-सप्त-स्वरादिविवेचनं पूर्वरङ्गलक्षणादिविवेचनञ्च कृतमस्ति। ततः परमर्थप्रकृतीनां कार्यावस्थानां सन्धीनामर्थोपक्षेपकानाञ्च सविस्तरं वर्णनमस्ति। अष्टमेऽधिकारे प्रेक्षकनटादिलक्षणविवेचनं भारत्यादिवृत्तीनां चित्रणम् अङ्कस्य रसालङ्कारसंख्यादीनां प्रदर्शनं नाटकलक्षणादिविवेचनञ्च कृतमस्ति।

नवमेऽधिकारे उपरूपकाणां विवेचनं कृत्वा नायकादीनामुचितनामानि प्रदर्शितवान् शारदातनयः। ततश्च कविसमयादिकं प्रदर्शितवान् दशमेऽधिकारे चात्र भूमौ नाट्यावतरणादिकं विविच्य लास्यताण्डवलक्षणादीन् प्रदर्शयति। तदनन्तरं रसादिवाक्यार्थता तदुदाहरणानि चावलोक्यन्तेऽत्र भावप्रकाशने।

---
1. भावप्रकाशने - 1/9 2. भावप्रकाशने - 7/10

**नाट्यपरम्परायाः विकासे शारदातनयस्य योगदानम्-**

नाट्यशास्त्रपरम्परायां शारदातनयस्य विशिष्टं योगदानं वर्तते। अस्य भावप्रकाशनस्य अध्ययनात् तत्र स्थितानामनेकेषां मौलिकतत्त्वानां समुद्घाटनं भवति। ग्रन्थस्यास्य प्रामाणिकता उपादेयता च भतरनाट्यशास्त्रात् कथमपि नास्ति न्यूनतरा। ग्रन्थेऽस्मिन् नाट्यकलया सह सङ्गीतादिललितकलानामपि वैविध्यपूर्णं विवेचनं मिलति। यद्यपि भरतशारदातनययोर्मध्ये काले नाट्य-काव्यसङ्गीतनृत्यादिविषयकाणां नैकेषां ग्रन्थानां प्रणयनमभूत् तथापि कस्मिन्नपि ग्रन्थे नाट्यशास्त्रस्य कृते पञ्चमवेदस्य चिन्तनं नास्ति। न च उपर्युक्तानां नाट्या-दिसकलकलानां समष्टिरूपेणैकत्रोपस्थितिर्विलोक्यते। आसां कलानां विलक्षणं सामञ्जस्यं केवलं भावप्रकाशन एव द्रष्टुं शक्नुमः। यस्य सुनियोजितलेखनशैली वेदान् स्मारयति। अतोऽत्र भावप्रकाशनमेव पञ्चमवेदो भवितुमर्हति। आचार्यभरतस्तदुत्तरवर्तिनो नैके आचार्याश्च ब्रह्मण एव नाट्योत्पत्तिमङ्गीकृतवन्तः। परमत्रशारदातनयः शिवेन सह नाट्योत्पत्तिं सम्बध्य वैदिकलौकिकयोर्द्वयोरेव भावभूम्योरलङ्करणं कृतवान्।[1] शिवस्य नटराजरूपत्वात् नाट्योत्पत्तिः यादृशी तार्किका शाश्वती च प्रतीयते तादृशी ब्रह्मण उत्पान्न। भावप्रकाशने भूमौ नाट्यावतरणस्य श्रेयः सूर्यपुत्रस्य मनोः कृते प्रदत्तं [2] न तु भरतमिव नहुषाय। ग्रन्थकारस्य नाट्योत्पत्तिविषयिणी गाथेयं नूतनसंकल्प-नाऽस्ति नान्यत्रायं प्रसङ्गः मिलति।

नाट्यदर्शनयोः गुम्फने शारदातनयस्य विशिष्टं योगदानं वर्तते। असौ नाट्यविषयकाणि विभिन्नानि तत्त्वानि दार्शनिकपृष्ठभूमौ संस्थाप्य स्वावहितदृष्ट्या परीक्षितवान्। भावप्रकाशनेऽत्र नाट्यविषयैः सह काव्य-शास्त्रीयविषयाणामपि नैपुण्येन सम्मिश्रणमालोक्यते। भरतस्य रसदृष्टिर्नाट्योन्मुखी अवर्तत, किन्तु परवर्तिनामाचार्याणां चेयं काव्योन्मुखी सञ्जाता। परमत्र शारदातनयस्य रसदृष्टिः उभयत्र समन्वयेन स्थिता वर्तते।

नाट्ये रसस्य पोषणार्थं नाटकीयपात्राणां संयोजनं भवति। शारदातनयेन पात्राणां वैविध्यपूर्णं चित्रणं कृतमस्ति। यद्यप्यनेनापि अभिनवगुप्त इव सहृदयः प्रेक्षक एव रसस्याश्रयः स्वीकृतः नटो न, तथापि तन्मतानुसारं पात्राणामुपेक्षां कर्तुं न शक्यते। यतो हि पात्राणि एव रसं सामाजिकानामन्तः करणं यावत् नाययन्ति। भरतमिवा-ऽयमप्याचार्यः पात्राणां चरितस्य मनोवैज्ञानिकं विश्लेषणं प्रास्तौत्। अयं भरतोक्तानां सनाटिकानां दशरूपकाणां प्रतिपादनं कृत्वा विंशतिपरिमितानामुपरूपकाणां निरूपणं कृतवान्। अर्थप्रकृतीः कार्यावस्थाः साङ्गं सन्धीन् अर्थोपक्षेपकान् सविस्तरं प्रदर्श्य नाट्याचार्योऽयं वस्तुविवेचनं प्रास्तौत्।

संक्षेपेण वक्तुं शक्नुमो यदस्य ग्रन्थे सर्वाणि नाट्यविधानानि प्रदर्शितानि सन्ति। नाट्यस्य सैद्धान्तिकपक्षेण सह व्यावहारिकपक्षस्यापि वैज्ञानिकं विवेचनं प्रतिपादितमस्ति। भावप्रकाशने शारदातनयस्य वक्तव्यस्याद्भुतगरिमा, सुस्पष्टता विषयावगाहिता, गम्भीरता, प्रवाहात्मकता, समन्वयात्मकता, सूक्ष्मता दार्शनिकशालीनता गौरवान्वितप्रगल्भता सर्वाङ्गीणता मौलिकता चेति अभूतपूर्वाः विशेषता आलोक्यते।

**शोधच्छात्रा**

**राजकीय-आचार्य-संस्कृत-महाविद्यालयः,**

**बीकानेरम्**

**सन्दर्भग्रन्थाः-**

1. भावप्रकाशनम् - हिन्दीभाष्यानुवादकारः डॉ. मदनमोहनः अग्रवालः-चौखम्भासुरभारती प्रकाशन-संस्करण 2012

2. संस्कृत-वाङ्मय का इतिहास-सम्पादक-आचार्य बलदेव उपाध्याय अष्टम खण्ड-काव्यशास्त्र प्रकाशक-उत्तरप्रदेश संस्कृत संस्थान, लखनऊ प्रथम संस्करण-2001 ई.

1. भावप्रकाशने - 3/11,10/3    2. भावप्रकाशने - 10/7

# पाणिनीयम् इत्सञ्ज्ञाविज्ञानम्

❑ लोकेश कुमार शर्मा

दैनिकवाग्व्यवहारस्य माध्यमत्वेन अङ्गीकृतायाः भाषायाः कृते निश्चितनियमानाम् आवश्यकता भवति। भाषायाः एते नियमाः एव 'व्याकरणम्' इत्यभिधीयते। संस्कृतभाषायाः कृते अपि व्याकरणं प्रारम्भिककालादेव निर्मितम्। सर्वप्रथमम् इन्द्रेण ऐन्द्रं व्याकरणं लिखितम्। व्याकरणेऽस्मिन् लक्षाधिकाः नियमाः आसन्, ये च सुविशालाः सुदीर्घाः विस्तृताश्चासन्। तदनु नैके ऋषयः व्याकरणानि व्यरचन्। परन्तु वैज्ञानिकतया अत्यन्त-लघुस्वरूपे प्रथमं व्याकरणं पाणिनिना अष्टाध्यायी-रूपेण प्रस्तुतम्। ऐन्द्रव्याकरणे ये लक्षाधिकाः नियमाः आसन्, तेषां संक्षिप्तीकरणं कृत्वा प्रायः चतुःसहस्रेषु सूत्रेषु सर्वमपि संस्कृतव्याकरणं पाणिनिना लिखितम्।

पाणिनेः अस्मिन् संक्षिप्तीकरणे मुख्यतः प्रयोजकत्रयं वर्तते। तत्र प्रथमं कारणं वर्तते- **उत्सर्गापवादविधि**रिति। अष्टाध्याय्यां प्रथमं विस्तृतरूपेण सामान्यनियमाः प्रस्तुताः, तदनु तेषां नियमानां विशेषत्वेन अपवादाः निर्मिताः। उक्तं च-'**सामान्येनोत्सर्गाः विशेषेणापवादाः**' इति। पाणिनिः सर्वप्रथमं सुदीर्घविषयं स्वीकृत्य नियमीकरोति। तत्पश्चात् लघुं विशेषं च विषयं स्वीकृत्य अपवादान् प्रस्तौति। अनेन व्याकरणं सक्षिप्तं जातम्। संक्षिप्तीकरणे एव द्वितीयं प्रयोजनं वर्तते-प्रत्याहाराः। वर्णानां पृथक्पृथक्कथने माहात्म्यं भवति। यथा सर्वे वर्णाः द्विचत्वारिंशत् सन्ति। यदि तेषां पृथक्पृथगुपादानं भवेत् तर्हि दीर्घता भवति। परन्तु तेषां कृते 'अल्' इति प्रत्याहारेण लघुत्वं सम्पादितम्। कार्येण अनेन एव पाणिनिः साङ्गणिकवैज्ञानिकत्वेन प्रसिद्धः अभवत्।

परन्तु व्याकरणस्य संक्षिप्तीकरणे यद् विज्ञानं योगदानं च इत्सञ्ज्ञायाः वर्तते, न तावद् उत्सर्गापवादयोः प्रत्याहाराणां च। इत्सञ्ज्ञकवर्णाः मूलतः चिह्नरूपेण सन्ति। किमपि एकं कार्यसमूहं स्वीकृत्य, तस्य कृते चिह्नरूपेण वर्णान् स्वीकृत्य धातुप्रत्ययादिषु तेषां संयोजनेन कार्यस्य लघुकरणं पाणिनिना सम्पादितम्। यथा 'त', 'तवत्', 'त्वा'- इत्यादिषु प्रत्ययेषु समानं कार्यं दृष्ट्वा, तेषां कृते 'क्'- इति वर्णः इत्सञ्ज्ञकर्णत्वेन एषु प्रत्ययेषु संयुक्तः। यथा गुणनिषेधः सम्प्रसारणादयः विषयाः कित्-प्रत्ययेषु भवन्ति। यत्र-यत्र एते कार्याः कर्तव्याः आसन् तत्र-तत्र पाणिनिना इत्सञ्ज्ञकवर्णत्वेन क्-इतिवर्णः आदौ प्रयुक्तः। परन्तु के वर्णाः इत्सञ्ज्ञकाः सन्ति?, के च न?, इति ज्ञापयितुं पाणिनिना इत्सञ्ज्ञा-विधायकानि सूत्राणि प्रस्तुतानि।

अष्टाध्याय्यां षट् सूत्राणि इत्सञ्ज्ञा-विधायकानि सूत्राणि सन्ति। तेषु प्रथमं सूत्रं स्वराणां कृते वर्तते। '**उपदेशेऽजनुनासिक इत्**'[1] इति सूत्रेण उपदेशावस्थायां ये ये अनुनासिकाः स्वराः सन्ति ते ते इत्सञ्ज्ञकाः भवन्ति इति। यथा शतृँ प्रत्यये ऋकारस्य इत्सञ्ज्ञा। अर्थात् धातु-प्रत्ययादिषु यः स्वरः इत्सञ्ज्ञकत्वेन चिह्नरूपेण वा स्वीकृतः, तस्य कृते अनुनासिकत्वं चिह्नं विधेयम्। उपदेशावस्था धातुप्रत्ययादीनां मौलिकी अवस्थेति। इत्थमेव हल्वर्णानां कृते इत्सञ्ज्ञाविधायकं सूत्रं '**हलन्त्यम्**'[2] वर्तते। तस्यामेव मौलिकावस्थायां ये ये हलन्ताः वर्णाः सन्ति ते ते सर्वे इत्सञ्ज्ञकाः सन्ति। यथा शीङ्धातौ ङकाररस्य इत्सञ्ज्ञा भवति।, अतः ङित्वात् शीङ्धातोः आत्मनेपदत्वं भवति। परन्तु अस्य सूत्रस्य प्रसङ्गे '**न विभक्तौ तुस्माः**'[3] इति आपवादिकः नियमोऽपि वर्तते। विभक्तिप्रत्ययेषु सुप्तिङ्प्रत्ययेषु योऽन्त्यः तवर्गः सकारः मकारः च तस्य इत्सञ्ज्ञा नैव भवति।

यथा भ्याम्-इत्यत्र मकाररस्य इत्संज्ञा न भवति। एते सूत्रे द्वे- 'उपदेशेऽजनुनासिक इत्' 'हलन्त्यम्' च उपदेशावस्थायामेव इत्सञ्ज्ञाकार्यं कुरुतः। उपदेशत्वेन प्रायः अनेन श्लोकेन विषयाः स्वीकृताः:-

**''धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।**
**आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः।।''** इति।

अष्टाध्याय्यां तृतीयम् इत्संज्ञाविधायकं सूत्रं वर्तते- **'आदिर्ञिटुडवः'**[4]। एतत् सूत्रं धातोरिति अधिकारे वर्तते। अर्थात् धातोः आदौ स्थिताः ञि-टु-डु च वर्णसमुदायाः इत्सञ्ज्ञकाः सन्ति। यथा टुनदि धातौ 'टु' इत्यस्य इत्संज्ञा। टु इत्यनेन टवर्गः नैव स्वीक्रियते, वर्णसमुदायानां ग्रहणात्। अन्तिमं सूत्रत्रयं प्रत्ययानां कृते वर्तते। प्रत्ययादौ षकाररस्य इत्सञ्ज्ञाविधातुं **'षःप्रत्ययस्य'**[5] इति सूत्रं वर्तते। यथा षाकन् प्रत्यये षकारस्य इत्संज्ञा। एवमेव प्रत्ययादौ चवर्गीयाणां टवर्गीयाणां च वर्णानां कृते **'चुटू'**[6] इति सूत्रम् उपस्थापितम्। यथा चाप् प्रत्यये चकारस्य टाप्-प्रत्यये च टकारस्य इत्संज्ञा। तद्धितभिन्नप्रत्ययादौ लकार-शकार-कवर्गीयानां वर्णानां कृते **'लशक्वतद्धिते'**[7] इति सूत्रम् उपस्थापितम्। यथा क्तप्रत्यये ककारस्य, ल्यप् प्रत्यये च लकारस्य इत्संज्ञा। अर्थात् अन्तिमं सूत्रं तद्धितप्रत्ययेषु कार्यं नैव करोति।

इत्थम् एतानि षट् सूत्राणि इत्सञ्ज्ञकवर्ण-विधायकानि सन्ति। एभिः सूत्रैः 'के के वर्णाः चिह्नरूपेण उपस्थापिताः?' इति ज्ञायते। इत्संज्ञवर्णैः समुदायानां निर्माणं भवति। यथा ककार-इत्संज्ञकाः 'कित्' -इति। कार्याणां सङ्कलनं कृत्वा एकवारमेव कथनेन व्याकरणं संक्षिप्तं जातम्। पाणिनेः अष्टाध्याय्याम् एकविधानां कार्याणां सङ्कलनम् एकत्रीकरणं वा कृत्वा, तत्कृते चिह्नरूपेण इत्सञ्ज्ञकाः वर्णाः स्वीकृताः। अतः तेषां कार्याणां पौनःपुन्येन कथनस्य आवश्यकता नैव भवति। तच्चिह्नेन सर्वेषामपि कार्याणां ज्ञानं प्रस्तूयते। एतेषाम् इत्संज्ञकवर्णानां लोपः **'तस्य लोपः'**[8] इति सूत्रेण भवति। अर्थात् इत्संज्ञकवर्णाः कार्यज्ञापनार्थम् एव उपस्थिताः भवन्ति। मौलिकस्वरूपे ते न व्यवह्रियन्ते। अतः इत्संज्ञकाः वर्णाः 'अनुबन्धाः' इति व्यवह्रियन्ते, इत्संज्ञकवर्णस्य लोपः 'अनुबन्धलोपः' इति कथ्यते।

1. **'उपदेशेऽजनुनासिक इत्'-अष्टाध्यायी १-३-२**
2. **'हलन्त्यम्' – अष्टाध्यायी १-३-३**
3. **'न विभक्तौ तुस्माः' – अष्टाध्यायी १-३-४**
4. **'आदिर्ञिटुडवः' – अष्टाध्यायी १-३-५**
5. **'षःप्रत्ययस्य' – अष्टाध्यायी १-३-६**
6. **'चुटू'– अष्टाध्यायी १-३-७**
7. **'लशक्वतद्धिते' – अष्टाध्यायी १-३-८**
8. **'तस्य लोपः' – अष्टाध्यायी १-३-९**

**शोधार्थी**
**राष्ट्रिय-संस्कृत-संस्थानम्, जयपुर-परिसरः**

## संस्कृत समाचाराः

राजगंगा चैरिटेबिल ट्रस्ट संस्थया जयपुर-स्थाय ''सेवाधाम'' आश्रमाय समाजहितार्थं लक्षत्रयमुद्राणां (3 लाख रु.) सहायतार्थमनुदानं सहर्षं प्रत्तम्। विद्वत्प्रवरस्य डॉ. गङ्गाधरभट्टस्य स्मृतौ वृद्धाश्रम-निर्माणाय लक्षत्रय चेक पत्रादि प्रददती संस्था-संस्थापिका डॉ. राजेश्वरीभट्टवर्या चित्रे परिदृश्यते।



नारी-स्तम्भः

# कविकर्मकुशला-कृष्णा सोबती

❑ डॉ. राजेश्वरी भट्ट

महद्गौरवस्य विषयोऽयं वर्तते यत् 2017 तमे वर्षे साहित्यक्षेत्रे प्रदीयमानस्य 'ज्ञानपीठ' इति राष्ट्रस्य सर्वोच्चपुरस्कारस्य कृते प्रगतिशीलचिन्तनस्य प्रेरिकायाः, संघर्षशीलाया हिन्दीभाषाया उत्कृष्ट-लेखिकायाः 'कृष्णा सोबती' महाभागाया नाम निर्णायकमण्डलेन सर्वसम्मत्या समर्थितम्। हिन्दी साहित्यक्षेत्रे विविधासु विधासु सशक्तं सरसं सार्थकञ्च लेखनं कुर्वती 'कृष्णा सोबती' इदानीं राष्ट्रस्य वरिष्ठा लेखिका वर्तते। आत्मनः सशक्तलेखनेन राष्ट्रे अनेकैः साहित्यसंस्थानैः सम्मानिता 92 वर्षदेशीया 'कृष्णा सोबती' 18 फरवरी 1925 तमे वर्षे सम्प्रति पाकिस्तान-देशे स्थिते गुर्जरप्रान्ते जनिमलभत। कश्मीरप्रदेशस्य पर्वतानां सन्निधौ स्थितेऽस्मिन् रमणीये स्थले निवसन्ती 'कृष्णासोबती' बाल्यादेव प्रकृते-रुपासिका वर्तते। नतोन्नते पर्वतीयप्रदेशे अश्वारोहणं, पर्यटनञ्च कृष्णायाः सहजकर्म आसीत्। विदुष्याः कृष्णायाः कृतिषु यत्र, तत्र, सर्वत्र प्रकृतिप्रेम प्रतिबिम्बायते। चिनारप्रान्तस्य परिवेशे वर्द्धमानायाः 'कृष्णासोबती' महाभागायाः पिता सिविल सेवायाम् उच्चाधिकारी आसीत्, पुत्र्याः कृते उत्तमशिक्षाया व्यवस्थायै स आत्मनः पुत्र्याः प्रवेशं शिमलानगरस्थे छात्रोत्कर्षाय बहुश्रुते, 'लेडी इरविन' नाम्नि विद्यालये-ऽकारयत्। सर्वसुविधासम्पन्नेऽस्मिन् विद्यालये अभिजातकुलोद्भवैविभिन्नरुचिसम्पन्नैर्बालकैः सह पठन्त्या बालिकायाः कृष्णाया अन्तर्निहिता बहुमुखी प्रतिभा प्रस्फुटिता जाता। हिन्दीभाषायाः प्रख्यात-रचनाकारो 'निर्मल वर्मा' विद्यालये कृष्णायाः सहपाठी आसीत्। तत उच्चशिक्षां प्राप्तुं कृष्णा सोबती लाहौरनगरस्य 'प्रख्याते' फतेहचन्द्र महाविद्यालये प्रवेशं प्राप्तवती। अहं सर्वासु विशिष्टा भवेयम् कृष्णाया इदं चिन्तनम् अस्या वेशभूषायां, व्यवहारे, किमधिकमस्या लेखनेऽपि दृश्यते। देशस्य विभाजनानन्तरं 'कृष्णासोबती' दिल्लीनगरमागतवती। ततः प्रभृति अत्रैव निवसन्ती कृष्णासोबती सततं साहित्यसेवायां संलग्ना जाता। 1950 तमे वर्षे विदुष्या कृष्णया विरचिता 'लामा' इति प्रथमा कथा प्रकाशिताऽभवत्। ततः प्रकाशिता अन्या मित्रो मरजानी, दिलोदानिश, हमहशमत, यारों के यार, सूरजमुखी, जिन्दगीनामा सदृश्यः रचनाः साहित्यक्षेत्रे समसामयिक समस्यानां, नारीणां सामाजिक दशायाश्च दर्शिका वर्तन्ते। मेधाविन्याः कृष्णायाः प्रारम्भिकीषु कृतिषु पंजाबीभाषाया बाहुल्यं दृश्यते। अस्मिन् विषये प्रख्यात हिन्दी लेखकस्य अमृतलालनागरमहोदयस्य परामर्शेन, सतत-श्रमेण अभ्यासेन च कृष्णासोबती प्रायः दशवर्षेषु हिन्दीभाषायां नैपुण्यमधिगम्य अनेकानि समसामयिकानि सामाजिकतथ्यानि उद्घाटयन्तीभिः सशक्ताभिः कृतिभिः लोके विश्रुता जाता। परम्पराणां पद्धतेश्च अतिक्रमणं विदुष्याः कृष्णायाः सहजं चिन्तनं दृश्यते। 70 वर्षाणां वयसि डोगरी भाषाया रचनाकारेण शिवनाथमहोदयेन सह विवाहबन्धनम् अस्याः स्वतन्त्रचिन्तनस्य स्पष्टं प्रमाणं वर्तते। उन्मुक्तेन विशिष्टलेखनेन च कृष्णासोबती राष्ट्रे अनेकैर्दुर्लभैः पुरस्कारैः सम्मानैश्च सम्मानिता जाता। 1980 तमे वर्षे प्रज्ञावती कृष्णासोबती जिन्दगीनामा इति कृतिमाधारीकृत्य साहित्यअकादम्या सम्मानिता जाता। ततो 1996 तमे वर्षे कृष्णासोबती साहित्यअकादम्या फेलोशिप इति स्पृहणीयां शोधवृत्तिं प्राप्तवती, अनन्तरं 2001 तमे वर्षे इयं हिन्दी अकादमी दिल्लीतः शलाकासम्मानेन सम्मानिता जाता। 2010 तमे वर्षे दुर्लभं 'पद्मभूषण' इति राष्ट्रीयं सम्मानं

**अस्वीकृतवती। सम्प्रति 2017 तमे वर्षे 'ज्ञानपीठ' इति राष्ट्रे साहित्यक्षेत्रे सर्वोच्चसम्मानेन सभाजिता कृष्णा सोबती नारीणां कृते प्रेरणास्रोतो विशिष्टा विभूतिर्वर्तते।**

## हिन्दी

अत्यन्त गौरव का विषय है कि इस वर्ष 2017 में साहित्यक्षेत्र में दिये जाने वाले राष्ट्र के सर्वोच्चपुरस्कार 'ज्ञानपीठ' के लिए प्रगतिशील चिन्तन की प्रेरिका संघर्षशीला, हिन्दीभाषा की उत्कृष्टलेखिका कृष्णासोबती का नाम निर्णायक मण्डल के द्वारा सर्वसम्मति से समर्थित किया गया। हिन्दी साहित्य की विविध-विधाओं में सशक्त, सरस एवं सार्थक लेखन करने वाली 'कृष्णासोबती' इस समय राष्ट्र की सबसे बुजुर्ग लेखिका है। कृष्णा सोबती का जन्म 18 फरवरी 1925 में इस समय पाकिस्तान में स्थित गुजरात प्रान्त में हुआ था। कश्मीर प्रदेश की पहाड़ियों के निकट स्थित इस रमणीय प्रदेश में निवास करने वाली कृष्णा सोबती बाल्यावस्था से ही प्रकृति की आराधिका हैं। नतोन्नत पर्वतीय प्रदेश में अश्वारोहण करना कृष्णा सोबती के लिए स्वाभाविक कर्म था। यही कारण है कि विदुषी कृष्णासोबती की रचनाओं में यत्र तत्र सर्वत्र प्रकृति की छटा प्रतिबिम्बित है। चिनार प्रान्त के निकट बड़ी होने वाली कृष्णा सोबती के पिता सिविल सेवा में उच्चाधिकारी के पद पर कार्यरत थे। पुत्री के लिये उत्तम शिक्षा की व्यवस्था के लिए उन्होंने अपनी पुत्री का प्रवेश शिमलानगर में स्थित छात्रोत्कर्ष के लिए प्रसिद्ध ''लेडी इरविन'' नामक विद्यालय में व्यवस्थित किया। सम्पूर्ण सुविधाओं से सम्पन्न इस विद्यालय में अभिजात कुलों के विभिन्न रुचि सम्पन्न बालकों के साथ पढ़ते हुए 'कृष्णासोबती' की बहुमुखी प्रतिभा सहज ही प्रस्फुटित हुई। हिन्दीभाषा के प्रसिद्ध लेखक निर्मल वर्मा इसी विद्यालय में कृष्णा सोबती के सहपाठी थे। मैं सबसे विशिष्ट हूँ कृष्णा सोबती का यह चिन्तन इनकी वेशभूषा, व्यवहार यहाँ तक कि इनकी रचनाओं में भी दिखाई देता है। देश के विभाजन के पश्चात् 'कृष्णा सोबती' दिल्ली आ गई और तबसे यहीं रहकर साहित्य सेवा में संलग्न हो गई। 1950 में विदुषी कृष्णाजी के द्वारा विरचित कथा 'लामा' सबसे पहले प्रकाशित हुई। उसके पश्चात् प्रकाशित होने वाली मित्रो मरजानी, दिलोदानिश, हमहशमत, यारों के यार, सूरजमुखी, जिन्दगीनामा आदि रचनाएँ हिन्दी साहित्य जगत् में समसामयिक तथ्यों एवं नारी की सामाजिक दशा की दर्शिका हैं। मेधाविनी कृष्णा सोबती की प्रारम्भिक कृतियों में पंजाबी भाषा का बाहुल्य दिखाई देता है किन्तु हिन्दी भाषा के प्रख्यात लेखक श्री अमृतलाल नागर के परामर्श से एवं सतत अभ्यास एवं श्रम से कृष्णा सोबती ने दस वर्षों में हिन्दी भाषा में कुशलता प्राप्त कर अनेक समसामयिक तथ्यों को प्रकाशित करने वाली सशक्त रचनाओं से लोक सम्मान प्राप्त किया है। परम्परा एवं लीक से हटकर चलना कृष्णासोबती का सहज चिन्तन है। 70 वर्ष की आयु में डोगरी भाषा के लेखक 'शिवनाथ' के साथ विवाह बन्धन स्वीकार करना इसका स्पष्ट प्रमाण है। अपने उत्कृष्ट एवं विशिष्ट लेखन के लिए कृष्णा सोबती अनेक दुर्लभ पुरस्कार एवं सम्मान से अलंकृत हुई है। 1980 ई में कृष्णा सोबती द्वारा रचित 'जिन्दगीनामा' नामक रचना के लिए इन्हें 'अकादमी' द्वारा सम्मानित किया गया। वर्ष 1996 में 'साहित्य अकादमी' ने कृष्णासोबती को 'फेलोशिप' प्रदान की। वर्ष 2001 में 'हिन्दी अकादमी' दिल्ली द्वारा कृष्णा जी को 'शलाका सम्मान' से सम्मानित किया गया। 2010 ई. में 'पद्मभूषण' जैसे महनीय अलंकरण को कृष्णा सोबती ने अस्वीकार कर दिया। अब 2017 में राष्ट्र में साहित्य क्षेत्र में सर्वोच्च पुरस्कार प्राप्त करने वाली कृष्णा सोबती नारियों की प्रोरणा स्रोत एवं विशिष्ट विभूति है।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# शुण्ठी रुच्याऽऽमवातघ्नी

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**भारतवर्षे बहूनां द्रव्याणां चिकित्सात्मकः प्रयोगोऽवा स्वास्थ्यानुवर्तनात्मकः प्रयोगः काल-विशेषे परम्परागतरूपेण क्रियते ग्रामीणैर्जनैः। यद्यपि नगरस्थाः अपि जनाः बहुविधानामायुर्वेदीय-योगानां प्रयोगं पारम्परिक-रूपेण कुर्वन्ति, पुनरपि ग्रामीणास्तु विशेषेण कुर्वन्ति। हेमन्तशिशिरात्मके शीतकाले तूत्तरभारतीयाः जनाः स्वास्थ्यसंरक्षणार्थं रोगापनयनार्थं च रसायनात्मकानामुष्णवीर्यात्मकानां सद्यः प्रभावकर्तृणामुग्रौषधिस्वरूपाणां द्रव्याणां प्रयोगं कुर्वन्ति। किन्तु वर्तमानकाले परम्परागता-नामेतादृशानां योगानां प्रयोगे तु पूर्णरूपेण शैथिल्यं संजातम्। क्रमेस्मिन् हरिद्रायाः शुण्ठ्याः यवान्याः मेथिकायाश्च मोदकरूपेण प्रयोगस्य प्रचलन-मासीत्। वर्तमानकालेऽपि यत्र-तत्रैतेषां द्रव्याणां प्रयोगमत्यल्पाः जनाः कुर्वन्ति। अत्र शुण्ठीप्रयोग-मधिकृत्य किञ्चित् प्रस्तूयते।**

भारतवर्ष में अनेक द्रव्यों का चिकित्सात्मक प्रयोग अथवा स्वास्थ्यानुवर्तन स्वरूपक प्रयोग परम्परागत रूप से ग्रामीण जन काल विशेष में करते है। यद्यपि नगर के लोग भी अनेक प्रकार के आयुर्वेदीय योगों का पारम्परिक रूप से करते हैं फिर भी ग्रामीण तो विशेष रूप से करते हैं। हेमन्त और शिशिरस्वरूपक शीतकाल में तो उत्तरभारतीय लोग स्वास्थ्य संरक्षण के लिए और रोगों को दूर करने के लिए रसायन स्वरूपक उष्ण वीर्य वाले सद्यः प्रभाव करने वाले औषधिस्वरूपक द्रव्यों का प्रयोग करते हैं। किन्तु वर्त्तमान काल में परम्परागत ऐसे योगों के प्रयोग में तो पूर्णरूप से शिथिलता हो गयी हैं। इसक्रम में हल्दी का, सोंठ का, अजवाइन का और मेथिका के मोदक रूप से प्रयोग का प्रचलन था। वर्तमानकाल में भी यात्रा-तत्र इन द्रव्यों का प्रयोग बहुत कम लोग करते हैं। यहाँ शुण्ठी के प्रयोग को अधिकृत कर के कुछ प्रस्तुत किया जा रहा है।

शुण्ठीवर्णनक्रमे आचार्यः भावमिश्रः कथयति यत्-

**शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम्।**
**ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम्।। ४१।।**
**शुण्ठी रुच्यामवातघ्नी पाचनी कटुका लघुः।**
**स्निग्धोष्णा मधुरापाके कफवातविबन्धनुत्।। ४२।।**
**वृष्या स्वर्या वमिश्वासशूलकासहृदामयान्।**
**हन्ति श्लीपदशोथार्श आनाहोदरमारुतान्।। ४३।।**

भावप्रकाश निघण्टु-हरीतक्यादि वर्ग-४१-४३

शुण्ठी के वर्णन के क्रम में आचार्य भावमिश्र कहते हैं कि - शुण्ठी के ये नाम हैं- विश्वा, विश्व, नागर, विश्वभेषज, ऊषण, कटुभद्र, शृंगवेर, और महौषध। शुण्ठी रुचिकारक, आमवात को नष्ट करने वाली, पाचन करते वाली कटु रस वाली तथा लघु होती है। यह स्निग्ध होती है तथा वीर्य में उष्ण और पाक में मधुर होती हैं एवं कफ-वात एवं विबंध को नष्ट करने वाली होती है। यह वृष्य है, स्वर के लिए हितकर है तथा वमन, कास, शूल और हृद् रोगों एवं श्लीपद, अर्शोरोग, आनाह, उदररोग तथा वातरोगों की नष्ट करती है।

**अत्र वैशिष्ट्यं वर्ततेऽस्मिन् द्रव्ये यत् कटुरसात्मकमप्येतत् द्रव्यं मधुरविपाकात्मकं रसायनस्वरूपा-त्मकं च वर्तते। सामान्यतः कटुतिक्तकषायात्मक-द्रव्याणां विपाकस्तु कट्वेव वर्तते। किन्त्वस्याः विपाकस्तु मधुर एव वर्तते। कटुविपाकस्तु कर्शनात्मकः वर्तते। आचार्यः चरकः कथयति यत्-**

**शुक्रहा वद्धविण्मूत्रो विपाको वातलः कटुः।**
**मधुरः सृष्टविण्मूत्रो विपाकः कफशुक्रलः।।**

**चरकसंहिता सूत्रस्थान 26/61**

इस द्रव्य में यह विशेषता है कि यह द्रव्य कटु रस वाला होते हुए भी मधुरविपाक वाला और रसायन स्वरूप का होता है। सामान्यता कटु, तिक्त कषाय रस वाले द्रव्यों का विपाक तो कटु ही होता है किन्तु इसका विपाक तो

मधुर ही है। कटु विपाक तो कृश करने वाला होता है। आचार्य चरक कहते है कि कटु विपाक शुक्र को नष्ट करने वाला और वात को बढ़ाने वाला तथा मूत्र पुरीष का विबंध करने वाला होता है।

**मधुरविपाककारणत्वात् शुण्ठी तु शरीरस्य पुष्टिं करोति, दृढतामापादयति तथा प्रभावात् वृष्यापि वर्तते। सामान्यतया कटुरसमवृष्यं वर्तते किन्तु पिप्पलीनागरे वृष्ये कथिते। शुण्ठी विशेषेण आमवातघ्नी वातापहा च वर्तते अत एव विशेषेण वृद्धाः जनाः शीतकाले रसायनरूपेणास्य प्रयोगं कुर्वन्ति। प्रसूतास्वपि विशेषेणास्य प्रयोगं बलवर्धनार्थं पुष्ट्यर्थं गर्भाशयदार्ढ्यार्थमुदरस्थस्य वातस्यापनयनार्थं कुर्वन्ति। किन्तु वर्तमानकाले शिक्षिताः स्त्रियः प्रसवानन्तरं शुण्ठीप्रयोगं नैव कुर्वन्ति। प्रसवानन्तरं शुण्ठीप्रयोगस्तु निश्चितरूपेण करणीय एव। अत्र शुण्ठीप्रयोगद्वयमुल्लिख्यते।**

मधुरविपाक वाली होने के कारण शुण्ठी तो शरीर की पुष्टि करती है, दृढता लाती है तथा प्रभाव से वृष्या भी होती है। सामान्यतया कटुरस अवृष्य होता है किन्तु पिप्ली और शुण्ठी वृष्य कहे गये हैं। शुण्ठी विशेषरूप से आमवात को नष्ट करने वाली तथा वातनाशक है इसलिए विशेषरूप से शीतकाल में वृद्धलोग इसका रसायन रूप से प्रयो गरते है। प्रसूताओं में विशेषरूप से इसका प्रयोग बलबढाने के लिए, पुष्टि करने के लिए, गर्भाशय की दृढता करने के लिए और उदरस्थ वायु को दूर करने के लिए करते है। किन्तु वर्तमानकाल में शिक्षित स्त्रियाँ प्रसव के बाद शुण्ठी का प्रयोग नहीं करती है। प्रसव के बाद शुण्ठी का प्रयोग निश्चित रूप से करना ही चाहिए। यहाँ शुण्ठी के दो प्रयोगों का उल्लेख किया जा रहा है।

**शुण्ठीमोदकाः -**

**500 ग्रामपरिमितं शुण्ठीचूर्णं गृहीत्वा तत्र 1 किलो परिमितं घृतं प्रक्षिप्य होरात्रयं संस्थापनीयम्। पृथक् रूपेण च गोधूमचूर्णं 250 ग्रामपरिमितं गृहीत्वा 250 ग्रामपरिमिते घृते मन्देग्नौ शनैः शनैः तस्य गोधूमचूर्णस्य भर्जनं करणीयम्। तदनन्तर-मुपर्युक्तं घृतप्लुतं शुण्ठीचूर्णं सम्मिश्र्य 1250 ग्रापरिमितं सितोपलाचूर्णं प्रक्षिप्य विंशति-संख्यात्मकानां मोदकानां निर्माणं विधाय काचपात्रे संरक्षणीयाः ह्येते मोदकाः। प्रतिदिनं मोदकमेकं प्रातःकालेऽपरञ्च सायंकाले कुटीप्रावेशिकविधिना सेवनीयम् हि वर्तते। कुटीप्रावेशिकविधिस्तु विशेषेण रसायनफलदः वर्तते। कुटीप्रावेशिकविधौ तु वातातपरहिते भवने सुगोपितस्वरूपे स्थित्वैव मोदकानामेतेषां प्रयोगः सुखावहः। एतेषां प्रयोग-काले त्वम्लद्रव्याणां प्रयोगः सर्वथा निषिद्धो भवति। दधि-गुड-तैलसंयुक्तानामन्नपानद्रव्याणां प्रयोगः न करणीयः। भवनस्य बहिर्भागे साक्षात्रूपेण वातेन आतपेन च संपर्कः कदाचिदपि न करणीयः। पूर्णरूपेण विश्रमः परमावश्यकः वर्तते। स्नानपान-योरप्युष्णोदकप्रयोगः करणीयः, शिरस्नानमपि वर्जनीयम्। सुपाच्यस्य लघुगुणात्मकस्य स्वल्प-भोजनस्याभ्यवहरणं समुचितं फलप्रदं च भवति। दशस्वेव दिनेष्वेतेषां मोदकानां भक्षणं करणीयम्, परं तत्पश्चादपि विंशतिदिनपर्यन्तं परिहारः करणीयः, यतो हि परिहारकालः द्विगुणात्मकः भवति। यथा हि प्रोक्तमाचार्येण चरकेण-**

**कालस्तु वस्त्यादिषु याति यावांस्तावान् भवेद्द्विः परिहारकालः। च.सि. 1/54**

**अस्य वचनस्य व्याख्यानकाले चक्रपाणिः स्पष्टयति यत -**

**बस्त्यादिप्रयोगे यावान्कालो व्याप्यते, ततः कालाद्द्विगुणं कालं यावत् परिहार्यत्वेनोक्तं परिहर्तव्यम्।**

**च.सि. १/५४-चक्रपाणि**

500 ग्राम शुण्ठी का चूर्ण लेकर उसमें 1 किलो घी डालकर तीन घंटे तक रख देना चाहिए और अलग से 250 ग्राम गेहूं का आटा लेकर 250 ग्राम घी में मन्दागि में उस गेहूं के आटे को भून लेना चाहिए। उसके बाद

उपर्युक्त घी में भिगोये हुए शुण्ठी के चूर्ण को मिलाकर 1250 ग्राम मिश्री का चूर्ण डालकर 20 लड्डू बनाकर काच के पात्र में ये लड्डू रख देना चाहिए। प्रतिदिन एक लड्डू सुबह और एक लड्डू शाम को कुटीप्रावेशिक विधि से सेवन करना चाहिए। कुटीप्रावेशिक विधि तो विशेषरूप से रसायन का फल देने वाली होती है। कुटीप्रावेशिकविधि में तो वातातपरहित भवन में अच्छी तरह से संरक्षितरूप में स्थित होकर ही इन लड्डूओं का प्रयोग सुखदायी होता है। इनके प्रयोगकाल में तो खट्टे द्रव्यों का प्रयोग सर्वथा निषिद्ध होता है। दही, गुड और तैल वाले अन्नपान द्रव्यों का प्रयोग नहीं करना चाहिए। पूर्णरूप से विश्राम परम आवश्यक है। नहाने में और पीने में भी गर्म पानी का ही प्रयोग करना चाहिए। शिर सहित स्नान नहीं करना चाहिए। सुपाच्य और लघु गुणवाला अल्पमात्र भोजन समुचित फल देनेवाला होता है। दश दिन में ही इन लड्डूओं को खाना चाहिए। किन्तु उसके बाद भी 20 दिन तक परिहार (अपथ्य का त्याग) करना ही चाहिए क्योंकि परिहारकाल दो गुना होता है। आचार्य चरक कहते है कि - वस्ति आदि के प्रयोग करने में जितना समय लगता है उससे दो गुना परिहार काल होता है। इस वचन की व्याख्या करते हुए चक्रपाणि स्पष्ट करते हैं कि - वस्ति आदि के प्रयोग में जितना समय लता है उससे दुगुना समय पहिार के रूप में (अपथ्य के त्याग के रूप में) छोड़ना चाहिए।

**यद्यप्येतत् वचनं वमनादीनि कर्माण्यधिकृत्य प्रोक्तं पुनरप्युष्णवीर्यात्मकानां तीव्रस्वरूपाणां कुटीप्रावेशिकविधिना सेव्यमानानां रसायन-परकाणां द्रव्याणां सेवनक्रमेऽपि पालनीया ह्येषा समयसीमा। प्रसूताभिः निश्चितरूपेण सेवनीयाः ह्येते मोदकाः वातव्याधिग्रस्तैः जनैः तथा वृद्धैः जनैरपि सेवनीयाः वर्तन्ते।**

यद्यपि यह वचन वमनादि कर्मों को ध्यान में रखते हुए कहा गया है फिर भी उष्ण वीर्य वाले, तीव्र स्वरूप वाले कुटीप्रावेशिक विधि से सेवन करने योग्य रसायन स्वरूपक द्रव्यों के सेवन करने के क्रम में भी यह समय सीमा परिपालनीय होती है। प्रसूताओं के द्वारा निश्चित रूप से सेवनीय ये लड्डू वातव्याधिग्रस्त लोगों के द्वारा तथा वृद्ध लोगों के द्वारा सेवनीय हैं।

**शुण्ठयादिपाकः-**

**याः हि प्रसूताः स्त्रियः कथितेनोपर्युक्तेन कुटीप्रावेशिकविधिना शुण्ठीसेवनं कर्तुम् नेच्छन्ति तथा याः हि पितप्रकृत्यः मृदुस्वभावाः वा भवन्ति ताभिरस्य शुण्ठ्याः सेवनमपरेण विधिना करणीयम्। तस्मिन् विधौ त्वपरः शुण्ठयादिपाकः उल्लिख्यते-**

**200 ग्राम परिमितं शुण्ठीचूर्णं 200 ग्राम परिमिताश्च निष्तुषाः वातादगुलिकाः तथा 200 ग्राम परिमितान्येव खसखसरूपेण प्रसिद्धानि अहिफ़ेन-फलबीजानि गृहीत्वा संचूर्ण्य 5 किलोपरमिते दुग्धे प्रक्षिप्य मन्दाग्निना शनैः शनैः सर्वेषामेतेषां सम्यक्पाकः करणीयः। यदा हि दुग्धं स्त्यानीभूतं भवति तदा हि तत्र 1500 ग्रामपरिमितं सितोपलाचूर्णं प्रक्षिप्य पाकवत् साधु साधयेत्। तत् पश्चात् चुल्लिकातः अवतार्य पिप्पली-पिप्पलीमूल-मरिच-लवङ्ग-एला-त्वक्-पत्र-जातीफलेत्येषां द्रव्याणां सूक्ष्मचूर्णं 80 ग्राम परिमितमेव प्रक्षिप्य निधापनीयं, शीतीभूतस्यास्य पाकस्य सम्यक् खण्डानि कृत्वा संरक्षिते शीते स्थाने काचपात्रे संस्थापनीयानि। प्रातःकाले 50 ग्राम-परिमितायां मात्रायां सम्यक् सायंकालेऽप्यस्यामेव मात्रायां पाकस्यास्य सेवनं करणीयम्। सेवनकाले तूपर्युक्तस्य पथ्यस्वरूपस्यैव सेवनमाहारे समुचितं भवति, पुनरप्युष्णोदकेन शिरःसहितं स्नानं निषिद्धं न वर्तते। वातातपविधिना त्वस्य सेवनं करणेन यत्र-तत्र परिभ्रमणे कस्मिंश्चिदपि कर्मकरणे च न कोप्यवरोधः। प्रसूताभिः सेवनीयः ह्येषः पाकः सर्वैरपि सेवनीयः वर्तते विशेषेण तु ये वातव्याधिभिः ग्रस्ताः जनाः वृद्धा वा जनाः सन्ति तैरस्य सेवनं शीतकाले करणीयमेव। आमवात-संधिवात-पेशीशूल-**

**जानुशूल-शिरः-शूलेत्यादिभिः ग्रस्तैः जनैरस्य सेवनं करणीयम्।**

जो प्रसूता स्त्रियाँ कही गयी उपर्युक्त कुटीप्रावेशिक विधि से शुण्ठी का सेवन नहीं करना चाहती है तथा जो पित्त प्रकृति वाले या कोमल स्वभाववाली होती है उनके द्वारा इस शुण्ठी का सेवन दूसरी विधि से किया जाना चाहिए। उस विधि में तो दूसरे शुण्ठयादिपाक का उल्लेख किया जा रहा हैं।

200 ग्राम शुण्ठीचूर्ण और 200 ग्राम छिली हुई बादाम की गुलिया तथा 200 ग्राम खस-खस (पोश्त के दाने) ले कर चूरा करके 500 ग्राम दूध में डापलकर मन्दाग्नि से धीरे धीरे इन सब का अच्छी प्रकार से पाक करना चाहिए। जब दूध गाढा हो जाए (मावा हो जाए) तब उस में 1500 ग्राम मिश्री का चूर्ण डालकर पाक की तरह अच्छी तरह से सिद्ध करना चाहिए। उसके बाद चूले से उतारकर पिप्पली-पिप्पलीमूल-मरिच-लवंग-इलायची-दालचीनी-तेजपत्र और जायफल इन सब द्रव्यों का सूक्ष्म चूर्ण 80 ग्राम की मात्रा में डालकर रख देना चाहिए। ठंडा होने पर इस पाक के अच्छे टुकडे करके संरक्षित शीतल स्थान पर काचपात्र में रख देना चाहिए। प्रात:काल 50 ग्राम की मात्रा में तथा सायंकाल भी इसी मात्रा में इस पाक का सेवन करना चाहिए। सेवन काल में तो उपर्युक्त पथ्यस्वरूप को ही सेवन आहार में उपयुक्त रहता है फिर भी उष्णोदक से शिर सहित स्नान निषिद्ध नहीं है। वातातपविधि से तो इसका सेवन करने से इधर-उधर घुमाने में और कुछ भी कार्य करने में कोई रोक टोक नहीं है। प्रसूता स्त्रियों के द्वारा सेवनीय यह पाक सबके द्वारा सेवनीय है विशेषरूप से तो जो वातव्याधि से पीड्तिलोक है या जो वृद्ध लोग हैं उनके द्वारा इसका सेवन शीतकाल में करने योग्य ही है। आमवात-संधिवात-पेशीशूल-जानूशूल-शिर:शूल इत्यादि से पीड़ित लोगों के द्वारा तो इसका सेवन किया ही जाना चाहिए।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

# यौतुकी समस्या

❑ **डॉ. राकेश शास्त्री**

गौरवगुर्वे नयसम्पन्ने ज्ञान-विज्ञानपारावारे।
विश्वप्रसिद्धे आर्यावर्ते देवतुल्ये पवित्रे देशे।।
गंगाप्लाविते खलु भारतवर्षे। कीदृशी एषा यौतुकी समस्या।।1।।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता:। घोषोऽयं करोति उन्नतभालमस्य।।
तस्मिन्नपि पुनीते-देशे कथमेषा यौतुकी समस्या।। 2।।

पालयति मां सस्नेहेन माता तामेव नयनपुत्तलिकां वै।
यौतुकलुब्धाः राक्षसतुल्याः अग्नौ तां किल प्रज्वालयन्ति।।
देवतुल्ये पवित्रे देशेऽस्मिन् कीदृशी एषा यौतुकी समस्या।। 3।।

गृहांगणे पूर्वे या क्रीडिता कलिकेव या सदा सुवासिता।
हा खलु सा यौतुकलुब्धैः अग्निसात्कृता वह्निसात्कृता।।
देवतुल्ये पवित्रे खलु देशे कीदृशी एषा यौतुकी समस्या।। 4।।

लोचने यस्या इन्दीवरतुल्ये याभ्यां स्वप्नानि खलु दृष्टानि।
कथं नरभक्षकैः क्रूरैरेभिः खलु भयाक्रान्तानि वै कृतानि।।
देवतुल्ये पवित्रे खलु देशे कीदृशी एषा यौतुकी समस्या।। 5।।

पितृहृदयस्यैषा स्पन्दनं मातृकृते तु नेत्रांजनम्।
ईदृशी एषा गृहलक्ष्मी वै नृशंसैः कथमेभिः प्रज्वालिता।।
देवतुल्ये पवित्रे खलु देशे कीदृशी एषा यौतुकी समस्या।। 6।।

या भवितुं शक्या गृहलक्ष्मी या भवितुं शक्या प्राणदायिनी।
सा खल्वेषा स्त्रीधनलुब्धैः प्राणहारकं गरलं हि दत्ता।।
देवतुल्ये पवित्रे खलु देशे कीदृशी एषा यौतुकी समस्या।। 7।।

द्वारे यदा वरयात्राऽऽगता कन्या एषा खलु शृंगारिता।
हस्तयोरस्याः बहुरंगिनी रागांगिनी सखिभिः विरचिता।।
देवतुल्ये पवित्रे खलु देशे कीदृशी एषा यौतुकी समस्या।। 8।।

तया खलु सृष्टा स्वप्निलसृष्टिः तदैव कथितं दीयतां यौतुकम्।
श्रुत्वैतत्तस्याः कल्पनाः खलु संचूर्णिताः किल विदारिताः।।
देवतुल्ये पवित्रे खलु देशे कीदृशी एषा यौतुकी समस्या।। 9।।

यौतुकलुब्धा नैव चिन्तयन्ति यथा एषा कस्यापि कन्या।
तथैवास्माकमप्येका पुत्री अन्येषां भविष्यति वदान्या।।
देवतुल्ये पवित्रे खलु देशे कीदृशी एषा यौतुकी समस्या।। 10।।

यदि तयापि सह किलेदृशो व्यवहारो भवेत् श्वशुरालये वै।।
तदास्माकं हृदये कीदृशो वज्रपातो भवेद् दारुण:?
देवतुल्ये पवित्रे खलु देशे कीदृशी एषा यौतुकी समस्या।। 11।।

**सेवा निवृत्त अध्यक्ष:, संस्कृत-विभागस्य**
**श्री गोविन्द गुरु राजकीय महाविद्यालय:, बांसवाडा**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालयः ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोनः 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालयः शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्सः- 0141-2763656

राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेलः circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,